380

कृत्यरत्नावलिः

Kritya Ratnāvali	Title
Rāmchandra Bhatta	Author
	Editor
	Year, Vols.
	Publisher
380	Remarks

॥श्रीगणेशाय नमः॥ नमस्कृत्य रमानाथपदद्वंद्वलसत्तनुनाकृत्य रत्नाव
लिरम्यतन्यते विदुषां मुदे॥ तत्र चैत्रशुक्लप्रतिपदि संवत्सरारंभविधि
स्तत्र प्रतिपदौदयिकी ग्राह्या॥ चैत्रमासि जगद्ब्रह्मा ससर्ज प्रथमेऽहनि॥ शुक्ल
पक्षे समग्रं तु तदा सूर्योदये सतीति ब्रह्मपुराणात॥ दिनद्वये तद्व्याप्तौ तर
स्यैवाव्याप्तौ पूर्वैव॥ वत्सरादौ वसंतादौ बलिराज्ये तथैव च॥ सर्वविद्धैव कर्तव्या प्र
तिपत्सर्वदा बुधैः॥ इति वृद्धवसिष्ठोक्तेः॥ अस्य मलमासत्वेऽत्रैव संवत्स
रारंभः॥ तस्याः पूर्वसंवत्सरादितिथित्वात॥ अत्र तैलाभ्यंगो नित्यः॥ वत्सरादौ
वसंतादौ॥ बलिराज्ये तथैव च॥ तैलाभ्यंगमकुर्वाणो नरकं प्रतिपद्यते॥ इति
वृद्धवसिष्ठोक्तेः॥ अत्रैव नवरात्रारंभः॥ मलमासपाते तु उत्कर्षः॥ अत्र प्र १

पादानमुक्तं भविष्यपुराणे॥ अतीते फाल्गुने मासि प्राप्ते चैत्रमहोत्सवे पु
ण्येऽह्नि विप्रकथिते प्रपादानं समारभेत॥ तत्र यत्नः॥ प्रपा सर्वसामान्या
न्ते धर्मः॥ प्रतिपादिता॥ अस्याः॥ अस्याः प्रपादानात्पितरस्तृप्यंतु हि पिता
मस्म इति तत्रैव —— विचार्य ततो देयं जलं मासचतुष्टयमिति॥ तथा॥ प्र
पां दातुमशक्तेन विशेषाद्धर्मकिंप्रलसं धर्मघटको वस्त्रसंवेष्टितो नरः॥
ब्राह्मणस्य गृहे देयः शीतामलजलैः शुचिः॥ तत्र मंत्रः॥ एष धर्मघटो
दत्तो ब्रह्मविष्णुशिवात्मकः॥ तस्य प्रसादात्सफला मम संतु मनोर
थाः॥ अनेन विधिना यस्तु धर्मकुंभं प्रयच्छति॥ प्रपादानफलं सोऽपि प्रा
प्नोति न संशय इति॥ चैत्रशुक्लतृतीयायामीश्वरयुतां गौरीं संपूज्यांदो

जयेत॥ तथा च देवीपुराणे तृतीयायां यजेद्गौरीं शंकरेण समन्वितां॥ कुं
कुंमागरुकर्पूरमणिवस्त्रसुगंधकैः॥ स्रग्गंधधूपदीपैश्च नैवेद्येन विशे
षतः॥ आंदोलयेत्ततो वत्स शिवो मातुष्टये सदा॥ रात्रौ जागरणं कार्यं प्रात
र्द्दद्याच्च दक्षिणां॥ हेमवस्त्रान्नपानादि तांबूलानि स्रजा तु तमाप्नुवेदिति।
इयं मुहूर्त्तमात्रापि परा ग्राह्या॥ गौरीदेवत्यत्वात्॥ इयं च मन्वादिः सु
रूपत्वेनगतत्वात् कुतुपपूर्वाह्णव्यापिनी ग्राह्या हेमाद्रिस्तु सर्वा त्वितु स
दा ग्राह्यास्तूक्ता मनुयुगादयः॥ देवेकर्म्मणि पित्र्ये च कार्याश्चैवापरा
ह्णिके इति गालववचनात् सर्वा ह्यन्हि कीया त्यत्वात्॥ अत्र श्राद्धमुक्तं मा २

त्स्ये॥ कृतं श्राद्धं विधानेन मन्वादिषु युगादिषु॥ आयकानां द्विसाहस्रं
पितॄणां तृप्तिदायकमिति॥ अधिकमासे परिकर्तव्यं मन्वादिकं तैर्थिकं
च कुर्यान्मासद्वये पीचे ति स्मृतिचंद्रिकोक्तेः॥ अत्र पिंडदानं नास्ती॥ त
था च कात्या दर्शे विषुवायन संक्रांति मन्वादिषु युगादिषु॥ विनापि
पिंडनिर्वापं सर्वश्राद्धं समाचरेत्॥ एतदकरणे प्रायश्चित्तमुक्तं मंग्वि
धाने त्वं धुंकः भ्रति यं त्रे च शत कार्यं जपेत्॥ मन्वाद्यो यदा न्यताः
कुरुते नैव वा यदीति॥ एवं षण्णवतिश्राद्धान्यपि नित्यानि तेषामयं सं
ग्रहः॥ अमा मनुः १० युग ४ संक्रांति १८ वैधृति १८ पात १८ महाल

याः ॥ ५ ॥ अन्वष्टकं च पूर्वेद्युः षण्णवलोष्टकास्तथेति ॥ चैत्रशुक्लतृती
यामत्स्यजयंती ॥ चैत्रशुक्लपंचमी लक्ष्म्याः ॥ आषाढशुक्लैकादशी तल्प
रे ॥ इयं च मध्याह्नव्यापिनी ग्राह्या ॥ इयं च तदुपासकानां नित्या ॥ अन्ये
षां काम्या ॥ चैत्रशुक्लपंचमी कल्पादिः ॥ अत्र स्नानादि महाफलं ॥ अस्या
मेव श्रीव्रतं हेमाद्रौ विष्णुधर्मोत्तरे चैत्रशुक्लस्य पंचम्यां प्रजयित्वा त
थाश्रियं ॥ सकृद्देवान्नुयादेतत्फलं संवत्सरोद्भवमिति ॥ चैत्रशुक्लाष्ट
भ म्यां भवान्या उत्पत्तिः ॥ तत्र बाधनीया त्रोक्ता काशीखंडे ॥ भवानीयं स्तु ३
पश्येत्तच्छुक्लाष्टम्यां मधौ रवेः ॥ न जातु शोकं लभते सदानंदमयो भवेदि

ति ॥ अत्रैवाशोककलिकाप्राशनमुक्तं लैंगे ॥ अशोककलिकाश्चाष्टौ ये
पिबंति पुनर्वसौ ॥ चैत्रे मासि सिताष्टम्यां न ते शोकमवाप्नुयुः ॥ पुनर्वसुयो
गो नावश्यकः ॥ किंतु तिथिः शरीरं दैवं स्यात् तिथौ नक्षत्रमाश्रितं ॥ तस्मा
त्तिथिं प्रशंसंति न नक्षत्रं तिथिं विनेति ज्योतिःशास्त्रात् ॥ प्राशनमंत्रस्तु
भि त्वामशोक हराभीष्ट मधुमाससमुद्भव पिबामि शोकसंतप्तो मामशोकं
सदा कुर्विति विष्णुः ॥ पुनर्वसुबुधोपेता रामेष्टमधुमाससमुद्भव पिबा
मि शोकसंतप्तो मामशोकं सदा कुरु ॥ चैत्रमासि सिताष्टमी ॥ प्रातस्तु वि
धिना स्नात्वा वाजपेयफलं लभेदिति ॥ चैत्रशुक्लनवमी रामनवमी स्या

४ चमध्याह्नयोगिनी ग्राह्या अगस्त्यसंहितायां ॥ चैत्रशुद्धे तु नवमी पुनर्वसु
युता यदि ॥ सैव मध्याह्नयोगेन महापुण्यतमा भवेदिति दिनद्वये तादृशी चे
त्पुनर्वसुयुताप्याद्यैव नारदस्य विद्दिनद्वये चैत्रदापा ग्राह्या ॥ नवमी चा
ष्टमी विद्धा त्याज्या विष्णुपरायणैरित्यगस्त्यसंहितावचनात् ॥ इयं च व्रत
द्वयासकानां नित्या ॥ काम्या तु सर्वेषां भवतीत्यन्यत्र विस्तरः ॥ अत्र
मध्याह्ने [illegible] स्नानाद्रात्रौ जागरणं परेद्युः प्रातः पायसेन ब्राह्मणभोजन
पारणादिः ॥ चैति दिनद्वयात्मकं व्रतं कर्तव्यं इयं मलमासे न कार्या ॥ स्प
ष्टमासविशेषाख्या विहितं वर्जयेन्मलिम्लुच इति वचनात् ॥ संकल्पः ॥ उपो ४

ष्य नवमीं तद्ययामेष्वष्टसु राघव ॥ तेन प्रीतो भव त्वं मे संसारात्त्राहि
मां हरे इति ॥ अयं मंत्रस्तु दशाननवधार्थाय धर्मसंरक्षणाय च ॥ राक्षसा
नां विनाशाय दैत्यानां निधनाय च परित्राणाय साधूनां जातो रामः स्व
यं हरिः ॥ गृहाणार्घ्यं मया दत्तं भ्रातृभिः सहितोऽनघ इति ॥ प्रतिमादानमं
त्रस्तु इमां स्वर्णमयीं रामप्रतिमां समलंकृतां चित्रवस्त्रयुगच्छन्नां रामो
हं राघवाय ते श्रीरामप्रीतये दास्ये तुष्टो भवतु राघवः ॥ इति दत्वा विधाने
न दद्याद्दक्षिणां शुभां ॥ ब्रह्महत्यादिपापेभ्यो मुच्यते नात्र संशय इति ॥
चैत्रशुक्लैकादश्यां दोलोत्सव उक्तो ब्राह्मे चैत्रमासस्य शुक्लायामेकाद

५

ग्रंथं तु वैष्णवैः॥ आंदोलनीयो देवेशः सलक्ष्मीको महोत्सवैः रिति चैत्रशुक्ले
द्वादश्यां दमनोत्सवः॥ द्वादश्यां चैत्रमासस्य शुक्लायां दमनोत्सवः॥
बौधायनादिभिः प्रोक्तः कर्तव्यः प्रतिवत्सरमिति रामार्चनचंद्रिको
क्तेः॥ अत्र पारणात्पूर्वं विहितं पारणाहे न लभ्येत द्वादशीकलया पिबेत॥
तदा त्रयोदशी ग्राह्या पवित्रदमनार्पणे इति। तत्रैवोक्तेर्नित्यं चैव॥ ऊर्जे व्र
तं माघे दोलां श्रीवणे तंतुपूजनं॥ चैत्रे च दमनारोपमकुर्वाणो व्रजत्य
ध इति पद्मपुराणात॥ इदमुक्तकालाभावे पि कार्यं॥ उपाकर्मोत्सर्जनं
च पवित्रं दमनार्पणं॥ ईशानस्य बलिं विष्णोः शयनं परिवर्तनं॥ कुर्या ५

त्सुक्तस्य च गुरोर्मौंढ्ये पीति विनिश्चय इति॥ वृद्धगार्ग्यवचनात॥ चैत्रशु
क्लत्रयोदश्यां मदनं गव्रतं॥ तत्र पूर्वविद्धा ग्राह्या तस्यामेव च दमनेन पूजोक्ता॥ कू
र्मपुराणे॥ चैत्रशुक्लत्रयोदश्यां मदनं चंदनात्मकं॥ सकृत्वा संपूज्य
यत्नेन वीजयेद्व्यजनेन च॥ ततः संतुष्टिमान् कामः पुत्रपौत्रसमृद्धि
द इति ---- भविष्योत्तरे तु अस्यां स्नात्वा त्रयोदश्यां मंत्रेण का
रयेत्स्मरं लिखेत॥ सिंदूर रजनीरागैः रतिप्रीतिसमन्वितं मध्याह्न
मंत्रेण --- त्वा नमो राः॥ यकामाय देवदेवस्य मूर्तये ब्रह्मवि
ष्णुशिवेंद्राणां नमः॥ क्षेमकराय वै इति॥ ततस्तस्याग्रतो देयामोद

८

श्रा घृतपाचिता ॥ नानाप्रकाररत्नानि स्वकामो मे प्रीयतामिति स्वपतिं पु
जयेन्नारी माल्यवस्त्रविभूषणैः ॥ कामोयमिति सर्विं ल्पम् हृषेन्नांतरात्म
ना रात्रौ जागरणं कुर्यात्सुस्त्रियर्यथावत्तत्पूजयेद्द्विप्रदांपत्यं वस्त्रालंकार
भूषणैः ॥ एवं यः कुरुते पार्थ वर्षे वर्षे महोत्सवं ॥ वसंतसमये प्राप्ते हृष्टः पुष्ट
सदा भवेदिति चैत्रशुक्लचतुर्दशी रात्रियोगिनी ग्रहीतव्या ॥ मधोः श्राव
णमासस्य शुक्ला या तु चतुर्दशी ॥ सा रात्रिव्यापिनी ग्राह्येति बोधायन
वचनात् ॥ चैत्रिपौर्णमासी सामान्यनिर्णयात्परैव ॥ अत्र विशेषो विष्णुस्मृ
तौ ॥ चैत्री चित्रायुता चेत्स्यात्तस्यां चैत्रवस्त्रप्रदानेन सौभाग्यमाप्नोतीति ८

तथा ब्रह्मे ॥ मन्वंतर्चार्केंगुरौ वापि वारे स्युस्तेषु चैत्रकी तत्राश्वमेधजं पुण्यं स्नान
श्राद्धादिभिर्भवेत् ॥ वायवीये ॥ संवत्सरकृतावीयाः स्नात्वा या रविवा
सुरात् ॥ दमनेनार्चयेच्चैत्र्यां विष्णोरेणसदाशिवं ॥ इयं मन्वादिश्चैत्रकृष्ण
चतुर्दश्यां विशेषमाह पुलस्त्यः ॥ चैत्रस्य चतुर्दश्यां यः स्नायात् शिवसंनि
धौ ॥ न प्रेतत्वमवाप्नोति ॥ गंगायां तु विशेषत इति ॥ अत्र ग्रहीतव्या कृष्ण
पक्षगतत्वात् ॥ इति श्रीतत्सदुपनामकश्रीरामचंद्रविरचितायां कृत्यरत्ना
वल्यां चैत्रकृत्यानि ॥ अथ वैशाखकृत्यं ॥ मात्स्ये ॥ तीर्थे चानुदिते स्नानं तिलै
श्च पितृतर्पणं ॥ दानं धर्मघटादीनां मधुसूदनपूजनं ॥ माधवे मासि कुर्वीत

मधुसूदनतुष्टिदं॥ अथ वैशाखस्नानं विष्णुस्मृतिपद्मयोः॥ तुलामकरे राशि
षु मेषे प्रातः॥ स्नानं विधीयते हविष्यं ब्रह्मचर्यं च महापातकनाशनमिति
चैत्र सौरमास उक्तः॥ अन्यच्च वेदपि पद्मद्वयमुक्तं पाद्मे॥ मधुमासस्य शु
क्लायामेकादश्यामुपोषितः॥ पंचदश्यां च भो वीर मेषसंक्रमणेपि वा वै
शाखस्नाननियतं ब्राह्मणानामनुज्ञया॥ मधुसूदनमभ्यर्च्य कुर्यात्त
संकल्पपूर्वकं॥ तत्र मंत्रः॥ वैशाखं सकलं मासं मेषसंक्रमणे रवेः॥ प्रातः
सनियमः स्नास्ये प्रीयतां मधुसूदनः॥ मधुहंतुः प्रसादेन ब्राह्मणान ७
मनुग्रहात् निर्विघ्नमस्तु मे पुण्यं वैशाखस्नानमन्वहं॥ माधवे मेष
ति

गे भानौ मुरारे मधुसूदन॥ प्रातःस्नानेन मे नाथ फलदो भव पापहन्
ति रुं तत्र त्रिकालं विष्णुपूजा कार्या॥ अश्वत्थमूले जलदानं चेत्यादि
तं त्रैवोक्तं॥ आ ताक्ष्यमत्र स्नानमुक्तं पाद्मे॥ त्रयोदश्यां चतुर्दश्यां
वैशाख्यां च दिनत्रयं॥ अपि सम्यग्विधाने ना नारी वा पुरुषोपि वा प्रा
तःस्नातः सुनियतः सर्वपापैः प्रमुच्यते यदा तु वैशाखे मलमा
सस्तदा समाप्तिः शुद्धमासे पूर्णिमायां कर्तव्या॥ तथा वैशाख्यां वि
धिवत्स्नात्वा भोजयेद्ब्राह्मणान् दश॥ कृसरं सर्वपापेभ्यो मुच्यते
नात्र संशयः॥ इति॥ वैशाखशुक्लतृतीयायां अक्षयतृतीया र

यगौरीव्रते उत्तरा कार्या॥ श्राद्धे कुतु य पूर्वाह्णव्यापिनी ग्राह्या॥ उदकुं
भदर्नास्नानादिरत्नेणदयं च कृतमनुज्ञारते॥ यामन्वाद्यायुगाद्याक्षति
थयस्तासु मानवः॥ स्नात्वा हुत्वा च दत्वानंतफलं लभेदिति॥ केचित्तु वै
शाखस्य तृतीयां यः पूर्वविद्धां करोति वै। हव्यं देवा न गृह्णंति कव्यं
च पितरस्तथेति गोभिलवचनात्॥ पूर्वविद्धैव सदा कार्या। युगक्रममनुयु
गादय इति नारदवचनाच्च॥ श्राद्धे तु पूर्वाह्णव्यापिनी उत्तरा देवकार्ये
तिवातितत्काद्वादशादिवितद्वयं युक्तं च॥ अपराह्णपितृणां अप
राह्णे तु पैतृकं॥ अपराह्णे पितृक्रियेत्यादिवचनैः॥ अपराह्णका ८

लत्वाभिधानात्कर्मणो यस्य तिवाक्यादपराह्णव्यापिन्या एव श्रा
द्धेयात्यत्वात्॥ दिमशुक्ल इत्यादिवाक्यागतः पूर्वाह्णशब्दस्तु कुत
पपूर्वाह्णपरः॥ शुक्लपक्षस्य पूर्वाह्णे श्राद्धं कुर्याद्विचक्षण इत्यत्र
क्यन्तपूर्वाह्णशब्दवत्॥ पूर्वाह्णिखीत गोभिलवचनं तु नाकरं सा
करत्वेपि पितुद्देशेन क्रियमाणतर्पणादिविषयं व्याख्यं यमित्यन्य
७ त्रविस्तरः॥ अथ विष्णो॥ वैशाखे शुक्लपक्षे तु तृतीयायां तथैव च॥ गं
गातोये नरः॥ स्नात्वा मुच्यते सर्वकिल्बिषैः॥ तस्यां कार्यो यवैर्होमो
यवैर्विष्णुं समर्चयेत्॥ यवान्दद्याद्द्विजातिभ्यः प्रयतः प्राशयेद्य

९ वानिति॥ अत्र दानविशेषो भविष्ये इमांत्र क्रम्य॥ उदकुंभान् सकर्लैका
न्सान् सर्वरसैः सह॥ यवगोधूमचणकान् सक्तून् दध्योदनं तथा॥ ग्रैष्मिकं
सर्वमेवान्नं सस्यं दानमत्रास्यते इति॥ देवीपुराणे॥ तृतीयायां तु वैशाखे रो
हिण्यर्क्षे प्रपूज्य च उदकुंभप्रदानेन शिवलोके महीयते॥ मंत्रः एष ध
र्मघटो दत्तो ब्रह्मविष्णुशिवात्मकः॥ अस्य प्रदानात्तृप्यंतु पितरोऽपि पि
नृ तामहाः॥ गंधोदकतिलैर्मिश्रं सान्नं कुंभं फलान्वितं॥ क्यानामार्थक्य
प्रसंगात्॥ नवदिनद्वयेकर्मकालव्याप्तिपक्षे तस्य निर्णयीकत्वात्रा
नर्थक्यमितिवाच्यं॥ तत्रापि गौणकालव्याप्त्याधिक्येन निर्णयात्॥ ९

तस्माद्दिनद्वयेपि प्रदोषव्याप्त्याभावे मुख्यपक्षगतत्वात्परैवेति॥ अ
स्यां च संकल्परूपव्रतोपक्रमो मध्याह्न एव कर्तव्यः॥ ततो मध्याह्नवेला
यां नद्यादौ विमले जले इत्युपक्रम्य परिधाय ततो वासो व्रतकर्म समार
भेत् इति तत्रैवोक्तेः॥ तत्र मंत्रः॥ श्रीनृसिंह महोग्रस्त्वं दयां कृत्वा ममो
परि॥ अद्याहं ते विधास्यामि व्रतं निर्विघ्नतां नयेति॥ ततो मध्याह्ने न
द्यादौ तिलगोमयतिलामलकैः॥ स्नात्वा गृहमागत्य गोमयोपलिप्ते
ष्टदलं कृत्वा तत्र कलशं संस्थाप्य हैमीं पलमात्रमितां तदर्धेन तदर्ध
मितां वा स्थाप्य प्राणप्रतिष्ठां कृत्वा॥ आवाहनाद्युपचारान् कृत्वा स्त

मानसमये पंचामृतेन स्नापयित्वा गंधादिभिः पूजयेत्॥ तत्र मंत्रः॥
नियुष्पाणि लस्मादि निषेधप्रजो॥ पूजयामि नृसिंह त्वा लस्मास्तत्नमो
स्तुते॥ इति पुष्पमंत्रः॥ कालागरुमयं धूपं सर्वदेवसुदुर्लभं॥ करोमि
तेमहाविष्णो सर्वकामसमृद्धये॥ धूपमंत्रः॥ दीपः पापहरः प्रोक्तस्तमो
राशिविनाशनः॥ दीपेन लभ्यते तेजस्तस्माद्दीपं ददामि ते॥ दीपमंत्रः॥
नैवेद्यं सुखदं चारु नानाभोज्यसमन्वितं॥ ददामि ते रमाकांत सर्वपाप
क्षयं कुरु॥ नैवेद्यमंत्रः॥ नृसिंहाच्युत देवेश लक्ष्मीकांत जगत्पते॥
अनेनार्घ्यप्रदानेन सफलाः स्युर्मनोरथाः इत्यर्घ्यमंत्रः॥ पितांबर महाबा १०

हो प्रल्हादस्तुवनासकृत्॥ यथामूर्तेनार्चनेन यथोक्तफलदो भव॥ इति
प्रार्थनामंत्रः॥ एवं पूजयित्वा जागरणादि कारयेत्॥ अस्या एव योग वि
शेषेणाश्चर्य स्मात तत्रैवोक्तं॥ स्वाती नक्षत्रयोगे च शनिवारे महद्व्रतं॥ सि
द्धियोगस्य संयोगे वणिजे करणे तथा॥ पुंसां सौभाग्ययोगेन लभ्यते
दैवयोगतः॥ तथापि तद्योगे विनापि स्यात्तद्दिनं पापनाशनं॥ सर्वेषामे
व वर्णानामधिकारोस्ति मद्व्रते॥ ज्ञायमद्दिनं यस्तु लंघयेत्स पापकृन्नरः
स याति नरकं घोरं यावच्चंद्रदिवाकरौ॥ अत एवेदं नित्यं काम्यमि
त्युक्तं॥ वस्तुतस्तु॥ श्रीनृसिंहोपासकानामेव नित्यं अन्येषां तु।

काम्यमेव॥ वैशाखस्य तु शुक्लपौर्णमास्यां विशेषेण विध्ये॥ वैशाखे रवी का
र्तिकी माघी तिथयो तीव सृजिताः॥ स्नाने दानविरीनास्तु नन्ते षायां
ऋनं दनेति इति वैशाष कृत्यानि॥ ॥छ॥ ——— — प्रथमादि करा
वेद अतं दुक्तम विष्यतिः अत्राथा ज्ञमवरक्त करवीर सूर्योदये नाना
फलैः प्ररुढस मधान्यैः उभ्युस्नानेन मंत्रेण कृमापयेत्॥ करवीर वि
षावा नमस्ते मानुवक्त्रा मामोलिमंडनदुर्गा दिदेवानां सतत प्रियेति
प्रार्थ्याद्याकृछेनेति मंत्रेण जत्वा संपूज्य प्रदक्षिणां कृत्वा स्वगृहं व्रजे
त्॥ एतद्व्रतं पुराणे सूर्याराधनकाम्यया॥ अष्टितान कृज्यासवि। ११

व्यासमत्तं सप्तद्रमयंत्या हर स्वत्या गायत्रागगणे तथा न्याञ्जिरपिना
री मिमत्ये लोके प्प तुरथ्यां करवी व्रत याथसप सौरम्यफक्च प्रदामि
ति॥ ज्येष्ठशुक्ल तृतीयायां रम्भाव्रतं॥ तथा च भविष्ये॥ भद्रे कुरुष्वं य
त्नेन रंभाख्यं व्रतमुत्तमं॥ ज्येष्ठस्य शुक्ल तृतीयायां स्नाना नियम तत्परे
ति॥ इयं पूर्वविद्धा ग्राह्या॥ वृहत्तपात त्यारंभा सावित्री वटपैतृकी॥
कृष्णाष्टमी च भूता च कर्तव्या संमुखि तिथिरिति स्कांदोक्तेः॥ ज्येष्ठ
शुक्ल चतुर्थ्यां गौरी व्रतं॥ ब्रह्मपुराणे॥ ज्येष्ठशुक्ल चतुर्थ्यां तु जाता
पूर्वमुमा संती तस्मात्तस्यां तत्र संपूज्या स्त्रीभिः सौभाग्यवृद्धये॥ उप

१२

त्रैश्च विविधैर्गीतनृत्योत्सवादिभिः । होमैः पयोभिर्वस्त्रैश्च पत्रपुष्पैः
स्रग्गंधैश्चिरिति ॥ ज्येष्ठशुक्लदशमी दशहरा ॥ तदुक्तं हेमाद्रौ भविष्ये ॥ ज्येष्ठे
मासि सिते पक्षे दशमी हस्तसंयुता ॥ हरेते दशपापानि तस्माद्दशहरा स्मृते
ति ॥ वाराहे तु ॥ गंगायां दशहरात्वमुक्तं ॥ दशम्यां शुक्लपक्षे तु ज्येष्ठे मासि
बुधेह्नि ॥ अवतीर्णा यतः स्वर्गाद्धस्तर्क्षे च सरिद्वरा । हरते दश पापा
नि तस्माद्दशहरा स्मृता ॥ तस्माद्दशहरा स्मृता ॥ तस्मात्स्नानं प्रकुर्वीत
दानं चैव विशेषत इति ॥ स्कांदे तु दश योगा उक्ताः ॥ यथा ज्येष्ठे मासि
सितेपक्षे दशम्यां बुधहस्तयोः ॥ गरानंदे व्यतीपाते कन्याचंद्रे वृषे रवि १२

वौ ॥ दशयोगे नरः ॥ स्नात्वा सर्वपापैः प्रमुच्यत इति ॥ इति बुधभौमयोर्विकल्पः
इयं च खंडले यत्र योगबाहुल्यं सा ग्राह्या ॥ योगाधिक्ये फलाधिक्यात् ॥
गंगा ॥ अभावे अन्यस्यां सरिति कार्यं ॥ तथा च स्कांदे यां कांचित्सरितं प्राप्य
दद्याद्दर्भतिलोदकं ॥ मुच्यते दशभिः पापैः समहापातकैरपि ॥ दशपापा
न्युक्तानि स्कांदे ॥ अदत्तानामुपादानं हिंसा चैवाविधानतः ॥ परदारोपसे
वा च कायिकं त्रिविधं स्मृतं ॥ पारुष्यमनृतं चैव पैशुन्यं चापि सर्वशः ॥ अ
संबद्धप्रलापश्च वाङ्मयं स्याच्चतुर्विधं ॥ परद्रव्येष्वभिध्यानं मनसानि
ष्टचिंतनं ॥ वितथाभिनिवेशश्च मानसं त्रिविधं स्मृतं इति ॥ अत्रवि

शेषः॥ काशीखंडे॥ ज्येष्ठे मासि सिते पक्षे प्राप्य प्रतिपदं तिथिं॥ दशाश्वमेधिके
स्नात्वा मुच्यते सर्वपातकैः॥ एवं सर्वासु तिथिषु क्रमस्नायी नरोत्तमः॥ आशु
क्लपक्षदशमीं प्रतिजन्माघमुत्सृजेत् इति॥ तथा॥ लिंगं दशाश्वमेधेशं दृष्ट्वा
दशम्यां तिथौ॥ दशजन्मार्जितैः पापैस्त्यज्यते नात्र संशय इति॥ मलमासे या
ते तु तत्रापि दशहरा कृत्यं कार्यं॥ पुनः शुद्धे तु नवत्येवेति॥ अन्यत्र मत
कृतो दृष्टव्यं॥ ज्येष्ठशुक्लैकादश्यां निर्जलैकादशीव्रतं॥ मस्करले स्कांदे॥
ज्येष्ठमासि नृपश्रेष्ठ या शुक्लैकादशी शुभा॥ निर्जलं समुपोष्यात्र जलं कुंभ
न्दहेमा दाद्दौ तिषेऽथ द्वेगरुडाशाश्चैव प्रजापत्यरं विस्तया॥ पौर्णिमा ज्येष्ठ १३

मासस्य सा ह्युपेष्ठी प्रकीर्त्तिते तिस्य शर्करान्न॥ प्रदाय विप्रमुख्येभ्यस्तापत्र
यविवर्जितः॥ विष्णुलोकमवाप्येह मोदते विष्णुसंनिधौ॥ इति॥ ज्येष्ठपौर्ण
मास्यां सावित्रीव्रतं स्कांदे स्ने विष्णुरैः॥ ज्येष्ठे मासि सिते पक्षे द्वादश्यां रज
नीमुखे इत्युपक्रम व्रतं त्रिरात्रमुद्दिष्टं दिवा रात्रं स्थिरा भवत इत्युक्तांते उ
पसंहृतं॥ ज्येष्ठे मासि सिते पक्षे पौर्णिमायां व्रतं शुभं चीर्यं पुरा महाभागया
कथितं ते मयानघेति॥ दक्षिणात्यास्त्वेतत्यमेव कुर्वंति॥ पाश्चात्यादयस्तु ज
मयामाचरंति॥ उक्तं च निर्णयामृते भविष्ये च॥ अमायां च तथा ज्येष्ठे व
टमूले महासती॥ त्रिरात्रोपोषिता नारी विधिनानेन पूजयेत्॥ अशक्तौ तु

त्रयोदश्यां नक्तं कुर्याज्जितेंद्रियः॥ अयाचितं चतुर्दश्यां अमायां समुपोष
णमीरितं॥ हेमाद्रिस्त्रिस्कान्दपदरी सूर्णिमायामिदमुक्तं॥ अत्र सूर्णिमाम
मावास्य सर्वविद्‌ग्राह्या॥ अतविद्वानकर्तव्या अमावास्या च सूर्णिमा
वर्जयित्वासुरश्रेष्ठ सावित्री व्रतमुत्तममिति व्रतलवे वर्तितं॥ अत्र सूर्णि
मानुरोधेनैव यथा त्रिरात्रं संयतिर्भवति त्रयात्रयोदश्यादियात्वं।
तस्याः प्राधान्यात्॥ एवममायामपि॥ अस्यामेव पौर्णमास्यां विशे
षआदित्यपुराणे॥ ज्येष्ठे मासि तिलान्दद्यात्पौर्णमास्यां विशेषतः॥ अ
श्वमेधस्य यत्पुण्यं तत्प्राप्नोति न संशयः विष्णुस्मृतौ॥ ज्येष्ठी ज्येष्ठा १४

युता चेत्स्यात्तत्र छत्रोपानत्प्रदानेन नरो नराधिपत्यमाप्नोतीति हेमाद्रौ स्यो
तिषे एंदे गुरुः शशी चैव प्राजापत्ये रविस्तथा॥ पौर्णिमा ज्येष्ठमासस्य म
हाज्येष्ठी प्रकीर्तिता इयं रोमन्वादिः॥ तथा च वामनपुराणे॥ उदकुंभां
कुदानं च तालवृंतं सचंदनं॥ त्रिविक्रमस्य प्रीत्यर्थं दातव्यं ज्येष्ठमासि
लिति॥ इति ज्येष्ठकृत्यानि॥ आषाढशुक्लद्वितीयायां रथोत्सवः॥
तदुक्तं तिथिरत्ने स्कांदे आषाढस्य सिते पक्षे द्वितीया पुष्यसंयुता॥
तस्यां रथे समारोप्य रामं वै भद्रया सह यात्रोत्सवं प्रवर्त्याथ प्रीणयेत
द्विजान्बहून्तथा त्रक्षाभावे तिथौ कार्या यात्रा सा प्रीतये मम मिति॥

मिथुनेच संक्रांतौ पराः शोउ सथ्यं॥ तकाः पुण्या आषाढस्य शुक्लदशमीषो
ल्मा सीचमन्वादिः॥ निर्णयसिंधु सर्वमुक्तः॥ आषाढमास् कार्तिकशुक्लद्वा
दशीषु अनुराधाश्रवणरेवतीयुक्तासु पारणं न कार्यं॥ उक्तं च विष्णौ॥ आनु
कासितपक्षेषु मैत्रश्रवणरेवती॥ संगमे नैव नो कुर्यात् द्वादशीद्वादशीं हरेदि
ति अनुराधः प्रथमं पाद एकवर्ज्यः अत्र विशेषो विष्णुधर्मे॥ मैत्राद्यपादे स्व
पतीह विष्णुः श्रुतेश्च मध्ये परिवर्त्तमेति॥ पौष्णांत्यपादे प्रतिबोधमेति सु
प्तिप्रबोधोपरिवर्तनमेव वर्ज्यमिति॥ आषाढशुक्लैकादश्यां तद्द्वादश्यां
वा विष्णुशयनोत्सवः कर्त्तव्यः॥ तदुक्तं ब्राह्मे॥ एकादश्यां तु शुक्लायामा १५

षाढे भगवान् हरिः। भुजंगशयने शेते क्षीरार्णवजले सदेति॥ भविष्ये॥ द्वादश्यां
शुक्लपक्षे च प्रस्वयावर्त्तनोत्सवा इति॥ वाराहे॥ द्वादश्यां संधिसमये नक्षत्राण
मसंभवे॥ आभाका सितपक्षेषु शयनावर्त्तनादिकमिति॥ अत्र द्वादश्यामि
ति पारणाहार्वविहितं॥ पारणा जेसर्वरात्रे घंटादीन्वादयन्मुजरिति॥ रामार्च
नचंद्रीकोक्तेः॥ इदं च मळमासे न कार्यं॥ ईशानस्यपवत्निविष्णोः सयनं परि
वर्त्तनं इति कालदर्शि निषेधात॥ अत्रैव चातुर्मास्यारंभो मारते उक्तः॥ आ
षाढे तु सितपक्षे एकादश्यामुपोषितः॥ चातुर्मास्य व्रतं कुर्याद्यत्किंचित्
यतो नरः इति॥ आस्य नित्यत्वं तत्रैवोक्तं॥ वार्षिकांश्चतुरो मासान्वाहयेत

केन चिन्नरः॥ व्रतेन नोचेदाप्नोति किल्बिषं वत्सरोद्भवं॥ असंभवे तुलार्के तु क
र्त्तव्यं तल्लयलतः इति॥ अस्यारंभः प्रोक्तास्तावपि कार्यः॥ नष्टे शावे न मोघं च
प्रक्रम्य वै निवार्तितिथेः॥ खंडितं वितिये दारो चतुर्मास्य विधौ नरः॥ इति वच
नात्॥ इदं च द्वितीयाद्यारंभ विषयं॥ एवमाशौचादौ द्वितीयारंभोऽनवस्थेव
अशुचिर्यास्तु चिर्वापि यदि स्त्री यदि वा पुमान्॥ व्रतमेतन्नरः कृत्वा मुच्यते
सर्वपातकैरिति स्कांदोक्तेः॥ आरब्धे सूतकं न स्यादनारब्धे तु सूतकमि
ति विष्णुवचनाच्च॥ यत्तु॥ असंक्रांतं तयामासं दैवे पित्र्ये च कर्मणि॥ म
लमासं समशौचं च वर्जयेन्मतिमान्नरः इति॥ भविष्योत्तरपुराणे वच १६

नेतत्प्रथमारंभविषयं॥ व्रतस्य ग्रहणप्रकारस्तु हेमाद्रौ भविष्ये षोडशोपचारैः
विष्णुं संपूज्य सुप्ते त्वयि जगन्नाथ जगत्सुप्तं भवेदिदं॥ विबुद्धे त्वयि बुध्येत
जगत्सर्वं चराचरं इति॥ प्रार्थनां कृत्वा॥ एवं तां प्रतिमां विष्णोः पूजयित्वा स्व
यं नरः॥ प्रबोधेनाग्रतो विष्णोः कृतांजलिपुटस्तथा॥ चतुरो वार्षिकान्मा
सान् देवस्योत्थापनावधि॥ इमं करिष्ये नियमं निर्विघ्नं कुरु मे च ते
भविष्ये॥ श्रावणे वर्जयेच्छाकं दधि भाद्रपदे तथा॥ दुग्धमाश्वयुजे मासि
कार्त्तिके द्विदलं त्यजेत्॥ स्कांदे॥ चत्वार्येतानि नित्यानि चतुराश्रमव
र्त्तिनां॥ प्रथमे मासि कर्त्तव्यं नित्यं शाकव्रतं नरैः॥ द्वितीये मासि कर्त्तव्यं र

धिव्रतमनुत्तमं॥ पयोव्रतं तृतीये तु चतुर्थे विनिशामय॥ द्विदलं बहुबीजं
च वृंताकं चैव वर्जयेत्॥ नित्यान्येतानि विप्रेंद्र व्रतान्याहुर्मनीषिणः॥ त
थाडंबीराजमाषांश्च मूलकं रक्तमूलकं॥ कुष्मांडं चेक्षुदंडं च चातुर्मास्ये
त्यजेद्बुधः॥ तथा विशेषाद्बदरीं धात्रीं कुष्मांडं चिंचीलीं त्यजेत्॥ जीर्णं
धात्रीफलं ग्राह्यं कंथेचिकायशोधने॥ स्कांदे कार्तिकेकाश्चतुरो मासा
न्सुप्ते वै जनार्दने॥ मंचखट्वादिशयनं वर्जयेद्भक्तिमान्नरः॥ अनृतौ
वर्जयेद्भार्यां मांसं मधु परौदनं॥ पटोलं मूलकं चैव वृंताकं चैव नत्त्रये
दित्यादि॥ शाकशब्दश्च दशसु रूढः॥ मूलपत्रकरीराग्रफलकांडाधि ७

रूढकाः॥ त्वाक्पुष्पं कवकं चैव शाकं दशविधं स्मृतमित्युक्तेः॥ अधिरू ८
ढंछत्रंकुरः॥ आचारप्रदीपे॥ वृंताकं च कलिंगं च बिल्वोदुंबरत्रिस्पदा
उदरे यस्य जीर्यंति तस्य दूरतरो हरिः॥ त्रिस्पटं दग्धान्नं॥ त्रीःसटे
तिदीर्यकाटे तु॥ त्रीःस्पृष्टं श्लेष्मातकमिति धन्वंतरिनिघंटः॥ तथा निष्पावा
न्राजमाषांश्च मसूरं संधितानि च वृंताकं च कलिंगं च सुप्ते देवे विवर्ज
येत्॥ संधितानि॥ लवणशाकादीनि॥ अत्रैव तप्तमुद्राधारणमुक्तं रा
मार्चनचंद्रिकायां॥ आषाढपौर्णमास्यां कोकिलाव्रतमुक्तं हेमाद्रौ त्रवि
ष्णु॥ आषाढपौर्णमास्यां तु संध्याकाल उपस्थिते॥ संकल्पयेन्मास

मेकं श्रावणे प्रत्यहं त्वहं ॥ स्नानं करिष्ये नियता ब्रह्मचर्यस्थिता सती ॥ क्रो
स्वामिन्नक्तं च शय्यां करिष्ये प्राणिनां दयामिति ॥ अस्य नक्तव्रतस्यात्र
शेषव्यापिनी ग्राह्या अत्रैव वाक्यात् सपूजाकाः तत्र मध्याह्नव्यापिनी देवादि ग्रा
न द्वयेत दर्शीचित्य रैवेति सन्यासपद्धतौ ॥ पौर्णमास्यां तु श्रावण कृस्तु
तृतीयायां श्रवणयुक्तायां विष्णुपूजा ॥ उक्तं हेमाद्रौ विष्णुधर्मोत्तरे ॥ तृती
यां श्रावणे कृष्णे या स्याच्छ्रवणसंयुता ॥ तस्यां संपूज्य गोविंदं तुष्टिमग्र्यां
समाप्नुयात् ॥ श्रावणकृष्णद्वितीयामारभ्याशून्यशयनव्रतं तत्र विष्णुपु
राणे कृष्णपक्षे द्वितीयायां श्रावणे वारनेते त्वत्र मूर्लिमं तो ग्याह्याः तस्यां १८

९

स्यां तिथौ प्रपूज्य हरिं ॥ श्रीवत्सांकं चतुर्भुजं पर्यंकस्थं समलक्ष्म्या गंधपु
ष्पादिभिर्मुदा ॥ ततो देवाय शय्यायां फलानि प्रक्षिपेत् क्रमात् जगत्पतिं प्रण
म्य दाविदमुच्चारयेन्नरः ॥ श्रीवत्सधारिन् श्रीकांत श्रीवास श्रीपतेऽव्यय ॥
गार्हस्थ्यं मा प्रणाशं मे यातु धर्मार्थकामदं ॥ अग्नयो मा प्रणश्यंतु या मा प्रणस्य
श्यंतु निर्जराः ॥ यान्यगा मा प्रणश्यंतु मत्तो दांपत्यभेदतः ॥ तथाग्नयः नि
र्जरा देवायाम्यगाः परतः ॥ लक्ष्म्या वियुज्यते देव न कदाचिद्यथा भवान् तथा
कलत्रं संबंधो देव मा मे वियुज्यतां ॥ लक्ष्म्या न शून्यं वरद यथा ते शयनं सदा ॥
शय्या ममाप्यशून्यास्तु तथात्र मधुसूदन ॥ एवं सप्तसाध्यप्रजीव कलत्र

दम्पास्तथा हरेः॥ फलाहारी न रथ्याछायायां मन्त्री ष्टानि जगत्पतेः॥ अन्नवंदा व्या
ध्रौ देयः॥ मंत्रः॥ गगनांगणसद्दीपक्षीरार्णमयमोऽस्तु व॥ मा चासित दिगाजो
गरमानुज नमोऽस्तु ते॥ न तं प्रणम्या यतने हरिं भुंजीत वाग्यतः॥ ब्राह्मणाय
द्वितीयेऽह्नि शक्त्या देया वदक्षिणा॥ फलानि तेभ्यो देयानि हेमयुक्तानि स
र्वथा वासो धान्यं तथा देयं व्रतसंपूर्णहेतवे॥ एवं करोति यः सम्यक्
नरो मासचतुष्टयं॥ तस्य जन्मत्रयं वीर रुद्रनं गो न जायते त्वोषा ढक्र
लं॥ श्रावणशुक्लतृतीयाम धुस्रवाख्या गुर्जरे सुप्रसिद्धा॥ परं तु नाया
स्येति दिवोदासीये॥ श्रावणशुक्लचतुर्थी गणपतिव्रते मध्याह्नव्यापि १९

नी सा तु परतश्चेत्स्ये रेहरिति॥ श्रावणशुक्लपंचम्यां नागपूजोक्ता भविष्ये
श्रावणे मासि पंचम्यां शुक्लपक्षे नराधिप॥ द्वारस्योभयतो लेख्या गोमये
न विषोल्बणाः॥ पूजयेद्विधिवद्वीर दधिदूर्वांकुरैः कुशैः॥ गंधपुष्पोप
हारैश्च ब्राह्मणानां च तर्पणैः॥ ये तस्यां पूजयंतीह नागान् भक्तिपुरः॥
सराः॥ न तेषां सर्पतो वीर भयं भवति कुत्रचित् इति इयं च परविद्धा
ग्राह्या दुक्तं चमत्कारचिंतामणौ पंचमी नागपूजायां कार्या षष्ठीसमन्वि
ता तस्यां तु न कतु विता नागा इतरा सचतुर्थिके ति श्रावणशुक्लद्वादश्यां
दधिव्रतमाशुक्तं॥ तत्र नक्तादीनां न निषेधः॥ तत्र दधि तत्ता नावात्॥ अ

अत्रैव द्वादश्यां विष्णोः ॥ पवित्रारोपणं हेमाद्रौ विष्णुरहस्ये श्रावणस्य सिते
पक्षे कर्कटस्थे दिवाकरे द्वादश्यां वासुदेवस्य पवित्रारोपणं स्मृतं ॥ द्वादश्यां
श्रावणे वापि पंचम्यां मघवा द्विज ॥ न्तु अत्र तु कुंभेषु कर्तव्यं पंचदश्यामथा
पि वेति ॥ शिवे तु तत्रैव कालोत्तरे आषाढांते चतुर्दश्यां नभसोस्तथा ॥ अ
ष्टम्यां च चतुर्दश्यां पक्षयोरुभयोरपि ॥ समभ्रिति ॥ अथवासनं तु दि
पिकायां ॥ गोदोहांतरीतकाले सर्वेषु रधिवासनमिति ॥ गौणकालस्तु
क्तो रामार्चनदिपिकायां ॥ पवित्रारोपणं विघ्नात् श्रावणे न चेद्यदि ॥ का
र्त्तिकावधि मुख्यकाले कर्तव्यमिति नारदः ॥ सुक्तास्तेः थैत्ये । तथा ॥ हेम २८

रौप्यताम्रक्षौमैः सूत्रैः कौशेयपद्मजैः ॥ कुशैः काशैश्च कार्या सौत्रा ब्राह्मण
कर्त्तितैः सूत्रैः ॥ कृत्वा त्रिगुणितं सूत्रं त्रिगुणीकृत्य शोधयेत् ॥ तत्रोत्तमं पवि
त्रं तु षष्ठ्या सप्तशतैस्त्रिभिः ॥ सप्तत्या सहितं वास्याच्छता स्याम्मध्यमं स्मृ
तं साशीतिना चैव कनिष्ठं तत्समाचरेत् ॥ साधारणपवित्राणि त्री
सूत्रैः समाचरेत् ॥ उत्तमं तु शतग्रंथि पंचाशद्ग्रंथि मध्यमं कनिष्ठं तु पवि
त्रं स्यात् षड्विंशद्ग्रंथिशोभितं षड्त्रिंशच्चतुर्विंशद्वादशेति च केचन ॥ चतु
र्विंशद्वादशाष्टाविंत्य केमुनयो विदुरिति हेमाद्रौ विष्णुरहस्ये ॥ कनिष्ठं
तं तु त्रिंशेयं सप्तविंसतिभिः सूत्रं ॥ चतुःपंचाशता ज्ञेयं तंतूनां मध्ये

संपरं॥ ●त्रमं चैव तं तत्कांशातमष्टोत्तरं स्मृतं॥ शिवपवित्रं तु तत्रैव शिवाग
मोएकादशग्रंथिवत्सूत्रैस्त्रिंशता वाष्टयुक्तया॥ पंचाशता वा कर्त्तव्यं तु लम्
ग्रथ्यंतरालकं॥ द्वादशांगुलमानि व्यासोद्दष्टांगुलानि च॥ लिंगविस्तार
मानानि चतुरंगुलकानि चेति॥ तत्र मंत्रः॥ देवदेव नमोस्तु ते त्वं गृहाण
इदं पवित्रकं॥ पवित्रीकरणार्थाय वर्षपूजाफलप्रदं॥ पवित्रकं कुरुष्वा
द्य यन्मया दुष्कृतं कृतं॥ शुद्धो भवाम्यहं देव त्वत्प्रसादात्सुरेश्वरेति॥ मू
लमंत्रसंपुटितेनानेन दद्यात्॥ प्रार्थनामंत्रस्तु॥ मणिविद्रुममालाभि
र्मंदारकुसुमादिभिः॥ इयं सांवत्सरी पूजा तवास्तु गरुडध्वज॥ वनमा २१

लां यथा देवकौस्तुभं सततं हरिः॥ पवित्रमस्तु ते तद्वत्पूजां च हृदये वहे
ति॥ ॥ एतच्च नित्यं॥ तत्रैव॥ न करोति विधानेन पवित्रारोपणं तु यः॥ त
स्य सांवत्सरी पूजा निष्फला मुनिसत्तमः॥ तस्माद्भक्तिसमायुक्तैर्नरैर्वि
ष्णुपरायणैः॥ वर्षे वर्षे विधातव्यं पवित्रारोपणं हरेरिति॥ तथा पवित्रा
रोपणं काले न करोति कथंचन॥ तदायुतं जपेन्मंत्रं स्तोत्रं वापि समाहित
इति॥ श्रावणशुक्लचतुर्दशी सर्वविद्धा ग्राह्या॥ चैत्रशुक्लचतुर्दशी
वत्॥ अथोपाकर्म॥ तच्च बह्वृचैः श्रवणे कार्यं॥ श्रवणस्य दिनद्वयव्या
प्तौ यदि ष्ठास्तु तं या हं यनिष्ठासुसुते कुर्याच्छ्रावणकर्म तद्वदिस्य सत

श्रवणेनतु यत्कर्म उत्तराषाढसंयुतं संवत्सरकृताध्यायस्तत्क्षणादेवन
पनश्यति पर्वण्यौदयिके कुर्युरित्यत्र औदयिकग्रहणं षण्मुहूर्तव्यापि
तातात्पर्यकं तथावृद्धवसिष्ठः उदये उदये संगवस्पर्शे श्रुतोपर्वणि वार्कि
मे कुर्युर्नमस्तुपाकर्म ऋग्यजुःसामगाः क्रमात् गुरुभार्गवयोर्मौढ्ये बाल्ये
वावार्द्धकेपिवा तथाधिमाससंसर्पमलमासादिषु द्विजः ॥ प्रथमोपाकृति
र्नस्यात् ॥ तं कर्मविनाशकृत् कश्यपः । याजुषैः पौर्णमास्यां ॥ सामगैः
सिंहस्थसूर्ये हस्तनक्षत्रे ॥ एषां खंडत्वे औदयिकानि ग्राह्याणि ॥ एषां
ग्रहसंक्रांतिदुष्टत्वे बह्वृचैः श्रावणशुक्लपंचम्यां यजुर्वेदिभिर्हि २२

षष्ठ्यां ॥ तेषां गृह्ये आषाढी उक्तात्रेषा दयां कार्यं ॥ वाजसनेयिभिस्तु पं
चम्यां उपाकृतिः सा पंचम्यां कार्या वाजसनेयिभिरिति वचनात् ॥ वाजसने
यिग्रहणं येषां गृह्ये पंचमी उक्ता तेषामुपलक्षणं ॥ ग्रहसंक्रांतियोग
आर्द्रानत्रत्त्वे ॥ विद्यमानएवं हस्ताकोनान्यथा ॥ तथा च गार्ग्यः ॥ अर्द्ध
रात्रादधस्तात्वेत् संक्रांतिग्रहणं तथा ॥ उपाकर्म न कुर्वीत रतश्चेत्र तेष
कुदिति ॥ इदं च कर्कटस्थे भानौ तन्निषिद्धं ॥ स च निषेधो नर्मदोत्तरत्रा
त्रविषयः ॥ नर्मदोत्तरतडागे तु कर्तव्यं सिंहयुक्तके ॥ कर्कटे संस्थिते भा
नौ नोपाकुर्यात्तु दक्षिणे इति वचनात् ॥ एतच्च शुक्रास्तादावपि कार्यं ॥

प्रथमारंभस्तत्र न कर्त्तव्यः॥ अधिमासे न भवत्येव॥ समग्रानां त्वधिमा
सेपि भवति॥ तेषां सिंहस्थसूर्ये त्वविधानात्॥ एतच्च सामगेतरपरं कि कार्यं॥
इतरैः स्ववाक्ये॥ इदं चौपासनाग्नौ भवति॥ अध्याप्येरन्वारब्ध इति पद्दे
लौकिके॥ श्रावण्यां आश्वलायनानां श्रवणाकर्मोक्तं॥ श्रावण्यां पौर्ण
मास्यां श्रावणाकर्मेति सूत्रं॥ तत्रास्तमयव्यापिनी ग्राह्या॥ अस्तमिते
स्थालीपाकं श्रपयित्वेति॥ अस्तमयकालविधानात्कर्मणो यस्य यः
काल इति वचनात्॥ याज्ञिकास्तु पौर्णमासीदावस्य पर्वसंधिग्रहणाच्च
न त्वासर्वसंधिदिवसे रात्रौ श्रवणाकर्मानुष्ठानं वदंति॥ अथ रक्षा २३

बंधनं युक्तं भविष्ये॥ स्मरे॥ ततोपराह्नसमये कुर्यात्सा टलीकां शुभां॥ का
रयेच्चाक्षतैस्तु सिद्धार्थैर्हेमचर्चितां॥ तत्र मंत्रः॥ येन बद्धो बली राजा दा
नवेंद्रो महाबलः॥ तेन त्वामपि बध्नामि रक्षे मा चल मा चल इति॥ अत्रा
पराह्णव्यापिनी पूर्वा ग्राह्या॥ श्रावणी दीर्घनवमी दूर्वा चैव हुताशनी॥
सर्वा विद्धैव कर्त्तव्या शिवरात्रिर्बलेर्दिनमिति बृहद्यमवचनात्॥ अस्मा
देव विशेषवचनात्॥ अन्ये अपि पवित्रारोपणादि श्रावणीकृत्येषु पूर्वै
व ग्राह्या॥ पूर्वास्यां भद्रासत्त्वेन तु रस्यामेव रक्षाबंधनं कार्यं॥ भद्रायां
द्वे न कर्त्तव्ये श्रावणी फाल्गुनी तथा॥ श्रावणी नृपतीं हंति ग्रामं दहति फा

ल्गुनी॥ इति वचनात्॥ अद्भुतसागरे नारदः॥ भानौ सिंहगते चैव यस्य गौः
संप्रसूयते॥ मरणं तस्य निर्दिष्टं षड्भिर्मासैर्न संशयः॥ तत्र शांतिश्च व
स्त्रामिथ्येन संपद्यते शुभं॥ आकृतीनां घृताक्तानां मयुतं जुहुयात्ततः
व्याहृतिभिश्चायं होमः सोपवासः प्रयत्नतः॥ दद्याद्विप्राय दक्षिणामि गो
ति॥ अथ र्ववदिनां गृह्यपरिशिष्टे॥ माघे बुधे च महिषी श्रावणे वड
वा दिवा॥ सिंहे गावः प्रसूयंते स्वामिनो मृत्युदायकाः इति दत्वा स वत्सां
तां द्विजेन्द्राय ततः शांतिं समाचरेत्॥ अत्र तदुक्ता अमृता शांतिः कार्या
श्रावणादिमासचतुष्टये कृष्णपक्षद्वितीयासु अशून्यशयनव्रतं २४

कार्यं॥ तत्र चंद्रोदयव्यापिनी ग्राह्या॥ त्रसत्वे असत्वे वा परा॥ चतुर्थ्यसि
तपक्षे चतुर्मासेषु श्रावणादिषु॥ अशून्यारंभं व्रतं कुर्यात्तुर्यवत्तुफ
ल्गाधिकमिति मदनरत्नोदाहृतवचनात्॥ श्रावणकृष्णतृतीया क
ज्जली संज्ञा सा च परेति दिवोदासीये॥ नभोबहुलस्य चतुर्थी बहुला
ख्या मध्यदेशे प्रसिद्धा॥ सा च सायाह्नव्यापिनी ग्राह्या॥ दिनद्वये त
त्वे पूर्वा तदुक्तं गोविंदार्णवे पुराणसमुच्चये गो यश्चतुर्थ्यां वरधे
नुः प्रजा दुग्धं चिन्तं दुर्गैः स्वैर्होलिके वत्सस्य प्रजाश्चिन्नरातिरेताः परान्वि
तो द्वितिरूपं संज्ञा बहिष्ठिनि॥ अत्र गोपूजा यवान्नाशनं च कार्यं॥ दि

वोदासीये॥अस्यामेवचतुर्थ्यांसंकष्टचतुर्थीव्रतंकार्यं॥श्राव
णेवकृष्णपक्षेचतुर्थ्यांतुविधूदये॥गणेशांशजयित्वातुचंद्रायार्घ्यंच
दीयतइति॥इयंचंद्रोदयव्यापिनीग्राह्या॥कर्मणोयस्ययःकालइ
तिवचनात्॥तत्कालेचंद्रार्घ्यदानविधानेनचंद्रोदयव्रतत्वाच्चंद्रोद
यव्रतेचैवतिथिस्तात्कालिकीस्मृतेतिवचनाच्च॥दिनद्वयेचंद्रोद
येसत्वेअसत्वेवापूर्वाग्राह्या॥चतुर्थीत्वितृतीयायांमहापुण्यफल
प्रदा॥कर्तव्याव्रतिभिर्वत्सगणनाथसुतोषिणीतिब्रह्मवैवर्तात्॥
गणेशगौरीबहुलाव्यतिरिक्ताः॥प्रकीर्तिताः॥चतुर्थ्यःपंचमीवि २५

२३

द्धादेवतांतरयोगतइतिवचनाच्च॥नचतृतीयाविद्धविधायकानिव
चनानिदिवारात्रिमुक्तविषेत्यवप्रवर्त्ततेनरात्रियागमात्रइतिवाच्यं
रात्रिसाध्येकर्मस्तु॥त्रावपिविधस्यजन्माष्टमीप्रकरणेमाधवादिभि
रीरितित्वात्॥एतएवमहालक्ष्मीव्रतसमापनेदिनद्वयेअष्टम्याश्चं
द्रोदयव्यापित्वेकृष्णपक्षे॥अष्टमीचैवकृष्णपक्षेचतुर्दशी॥पूर्व
विद्धैवकर्तव्यापरविद्धानकर्हिचिदितिवचनात्॥पूर्वविद्धाग्राह्या॥
तुक्तंहेमाद्रौमदनरत्नेच॥यानितु॥चतुर्थीगणनाथस्यमातृविद्धा
प्रशस्यते॥मध्याह्नव्यापिनीसातुपरतश्चेत्परेहनीत्यादीनिवचनानि

सिद्धिविनायकादिव्रतविषयाणि॥ तेषु मध्याह्नस्य कर्मकालत्वात्॥ प्रा
तः शुक्लतिथैः स्नात्वा मध्याह्ने पूजयेन्नृपेति वचनात्॥ एवं तेमाधवेन
मध्याह्नस्य कर्मकालत्वमंगीकृते वविनायकव्रते मध्याह्नव्यापिनी ग्रा
ह्येत्युक्तं॥ तस्मादुभयत्र चंद्रोदये सत्वे असत्वे वा पूर्वैवेति निर्णयः
पंथाः स्वलंब ऊन॥ अथ जन्माष्टमी॥ सा च श्रावणकृष्णाष्टमी॥ पूर्णि
मांतमासपक्षे भाद्रपदकृष्णाष्टमी॥ शुद्धेद्वे द्विधाप्यष्टमी प्रत्येकं द्विधा॥
द्वितीयदिने सूर्योदयोत्तरं सत्व सती च तादृश्यपि पुनः प्रत्येकं द्विधा॥
रोहिणीसहिता तद्रहिता च॥ तत्र शुद्धायां विद्धायां वा द्वितीयदिने सू २६

र्योदयादूर्ध्वमसत्वां विवाद एव नास्ति॥ द्वितीयदिने अष्टम्यभावात्॥
शुद्धाधिका या विद्धाधिका या वा एकास्मिन्नेव दिने रोहिणीयोगे यैव
रोहिणीयुतासैव ग्राह्या॥ दिनद्वयेपि रोहिणीयोगे अर्द्धरात्रे तद्योगव
तीग्राह्या॥ अर्द्धरात्रे तु योगोयं तारायन्तूदये सती विष्णुधर्मोक्तेः॥
दिनद्वयेप्यर्द्धरात्रं विनापि रोहिणीयोगे सप्तमी विद्धां निषेधान्नवमी
युक्तायाः प्रशस्तत्वादुत्तरा ग्राह्या॥ दिनद्वयेपि रोहिणीयोगाभावे
अर्द्धरात्रव्यापिनी ग्राह्या॥ अर्द्धरात्रस्य कर्मकालत्वात्॥ दीवा वाय
दिवा रात्रौ नास्ति चेद्रोहिणीकला॥ रात्रियुक्तां प्रकुर्वंति विशेषेणेंदु

संयुतामिति वचनाच्च॥ दरस्वमित्यं॥ वर्षे वर्षे च कर्त्तव्या तुष्ट्यर्थे चक्रपा
णिन इति विसाश्रवणात॥ अकुर्वन्निरकं यांति यावदिंद्राश्चतुर्दशी
तिश्रकरणे प्रत्यवायश्रावणाच्च काम्यं चेदं फलश्रवणात॥ त
थाच स्कांदे॥ सिध्यंति सर्वकार्याणि कृते जन्माष्टमीव्रते॥ इति॥ पारणं
तु केवलाष्टम्युपवासेति सिध्यंते॥ रोहिणीयुक्ताष्टम्युपवासे तु लग्नयां
ते कर्त्तव्यमिति मुख्यः पक्षः। अन्यतरांतो गौणः॥ यदी रात्रावुभयो
रन्यतरस्यवांतस्तदा रात्रावपि पारणं कार्य्यं॥ न रात्रौ पारणं कुर्यादृते
वै रोहिणीव्रतात॥ तत्र निश्यपि तत्कुर्याद्वर्जयित्वा महानिशामि २७

ति वचनात॥ अन्यशक्तेन उत्सवांते कार्य्यं॥ माधवेन तु यामत्रयोर्ध्व
गामिन्यां प्रातरेव हि पारणमिति वचनं लिखितं तदनुसारेणैव निर्ण
यः कृतः॥ श्रीकृष्ण देवकी वसुदेव नंदयशोदा॥ दादिप्रतिमानिर्माण
तत्पूजाप्रकारविशेषादिकाच्च तत्वविवेचने द्रष्टव्यं॥ विस्तारभयान्न
लिख्यते॥ संकल्पमंत्रस्तु॥ वासुदेवं समुद्दिश्य सर्वपापप्रशांतये
उपवासं करिष्यामि कृष्णाष्टम्यां नभस्यहमिति च॥ अर्घ्यमंत्रस्तु भवि
ष्ये॥ क्षीरोदार्णवसंभूत अत्रिनेत्रसमुद्भव॥ गृहाणार्घ्यं शशांकेमं
रोहिण्या सहितो मम॥ ज्योत्स्नापते नमस्तुभ्यं नमस्ते ज्योतिषां पते॥

नमस्तेरोहिणीकांतअर्घ्यंनुप्रतिगृह्यतामिति॥ श्रावणामावास्यायांकु
शग्रहणमुक्तंहेमाद्रौहारीतेन॥ मासेनभस्यमावास्यतस्यांदर्भोच्चयो
मतः॥ अयातयामास्तेह्येयाविनियोज्यापुनःपुनरितिनभाः। श्राव
णः दर्शांतिमइत्येतिदं॥ मदनरत्नेतु॥ मासेनभस्ये ऽमावास्यातस्यांद
र्भोच्चयोमतइतिमरीचिवाक्यमुदाहृतं॥ तल्लिंशुक्लभाद्रपद
यदिशुक्लप्रतिपद्दिनेतमारभ्यशिवद्रष्टंषष्ठापत्रानेकादिदेलि
खितं॥ अस्यामेवमौनव्रतंतदुक्तंस्कंदपुराणेप्रतिपद्मास्यांषोड २८
शाहात्मकंव्रतमान्नसमार्यस्तडागादिकांनदूर्त्वात्वाशिवध्यानपरः

सन्॥ दूर्वाःषोडशसंगृह्यषोडशग्रंथिसंयुतंतत्सूत्रंचकरेन्यस्यस्वस्ति
वाचामेननदक्षिणे॥ एवंविधानंकर्तव्यंयावत्स्यातप्रतिपद्दिनं। तद्दि
नेनैवसमसमाप्यर्थंव्रतस्यतु॥ येनैषानयोन्नोयंमौनेगोधूममयेष
लं। मौनेनैवप्रकर्त्तव्यंनैवेद्यंभोजनादिकंसर्वेयस्कारमादायगत्वाच
जलसंन्निधौस्नानंकार्यंतदातुत्रदिन—कर्मप्रवर्त्तिपश्चादिकादिदे
वांमंत्रैः संसृजयेत्तदः॥ वैदिकैःपौराणकैःषोडशोपचारैःसंकरंसृजये
त्॥ व्रतिनाहीनार्थीद्विजोऽग्नःसदक्षिणः॥ ततश्चशिवपूजाकार्यानारः
नावेनयत्कृतंतत्सर्वंममसर्वसिध्यात्वधर्मकामार्थसाधनंतुयत्पौत्र

प्रदद्यात्तत्सर्वकामफलप्रदं॥ इदं व्रतं षोडशवार्षिकं॥ संपूर्णे षोडशे
वर्षे तद्यापनं कुर्यात् यथाशक्ति शिवयोः सौवर्णीं राजतीं वा मूर्त्तिं विधा
य सम्यक् संपूर्णहोमं शिवमंत्रेण पायसेन विधाय अहयज्ञमयि कलाप्र
तिमा॥ द्वयमपि वस्त्रयुग्मद्वयं च वेष्टितं आचार्याय दद्यात् यथावित्त
वतो दक्षिणां दद्यात् ततः समाप्य सर्वं तु भुंजीयात् भाग्यतः शुचिः॥ प्र
ज्ञातायां तु सर्वस्य कस्मारंभोस्य विधीयते॥ सायं समाप्तिरुद्दिष्टा भो
जनं तु ततः परं— यः कुरुते द्विमोनस्या यापनं शुभं अकुप्रसौ ब
कुधनो जव ज्ञानाति पश्चात् शिवपदं सा लाव सेन्द्रः शिवसंनिधौ इति २९

३१

मौनव्रतं तृतीयायां हरितालिकाव्रतं कार्यं॥ तत्र सपरा॥ रंभाख्यां वर्जयि
त्वा तु तृतीया द्विजसत्तम॥ अन्येषु सर्वकार्येषु गणयुक्ता प्रशस्यते इ
ति ब्रह्मवैवर्त्तात्॥ तृतीया तु न कर्त्तव्या द्वितीयासंयुता तिथिरिति स्कां
दे द्वितीयायुक्ताया निषेधाच्च॥ निषेधप्रयोजकं च द्वितीयावेधो न
त्रिमुहूर्त्तः॥ किंतु कलाकाष्ठादिरूपोपि॥ तदुक्तं स्कांदे॥ कलाकाष्ठापि
वा चैव द्वितीया संप्रदृश्यते॥ सा तृतीया न कर्त्तव्या कर्त्तव्या गणसंयुते
ति॥ अत एव स्वल्पापि तृतीया चतुर्थीयुक्ता एकादशीवत् ग्राह्या॥
अयं चाल्पवेधप्रयुक्तो निषेधो गौरीव्रतविषयः॥ बिल्वायै कौतुकस्ना

रक्षामितिपर्युदासेनतत्साङ्गानामेवव्रतानांतराणिंप्रतीतेः॥ नकेवलंयुक्तम
न्यसङ्ग्रसार्थइतिन्यायात्॥ तथैवारीष्टसमाचारश्चेति॥ भाद्रपदशुक्ल
चतुर्थ्यांसिद्धिविनायकव्रतंस्कान्देकमलठवाचा॥ गजवक्त्रंतुशुक्ला
यांचतुर्थ्यांपूजयेन्नृप॥ यदिच्छाम्सद्यते॥ भक्तिस्नाताप्रज्योगणाधिपः
स्नातःशुक्लतिलैःस्नात्वामध्याह्नेपूजयेन्नृप॥ स्वशक्त्यागणनाथस्य
स्वर्णरौप्यामयाकृतिं॥ अथवामृन्मयींकुर्याद्वित्तशाठ्यंनकारयेत्॥
गणनाथस्यसिद्धिविनायकस्य॥ तत्स्वरूपमुक्तंतत्रैव॥ एकदंतंशूर्
र्पकर्णंगजवक्त्रंचतुर्भुजं॥ पाशांकुशधरंदेवंध्यायेत्सिद्धिविनायकमि ३०

१८

ति॥ एवंप्रतिमांकृत्वाप्राणप्रतिष्ठांकुर्यात्॥ तद्विधिःकालिकापुराणे॥
प्रतिमायाःकपोलौद्वौस्पृष्ट्वादक्षिणपाणिना॥ प्राणप्रतिष्ठांकुर्वीततस्या
देवस्यवाहरेः॥ अकृतायांप्रतिष्ठायांप्राणानांप्रतिमासुच॥ यथापूर्वं
तथाभावःस्वर्णहीनांतदेवता॥ अन्येषामपिदेवानांप्रतिमासुचपा
र्थिवाप्राणप्रतिष्ठाकर्त्तव्यातस्यांदेवत्वसिद्धये॥ अथप्राणप्रतिष्ठा
प्रयोगः॥ गणेशप्रतिमायाःकपोलौदक्षिणपाणिनास्पृष्ट्वा ॐगंॐगण
नांत्वेतिमंत्रंपठित्वागणेशायप्राणाःप्रतितिष्ठंतु॥ गणेशस्यप्राणाःच्चा
रेतवागणेशायदेवत्वसंरक्षायैस्वाहा॥ अन्यदेवेषुतद्बीजंमंत्रोपठि

त्वाचतुर्थ्यांततोदेवतापदमुक्तंस्वोक्तमंत्रंपठेदितिततः॥ कृत्वाप्रजांप्रय
त्नेनस्नाप्यपंचामृतैःपृथक्॥ गध्यश्चेतिनावक्त्रावैगंधंदद्याच्चभक्तितः॥
विनायकेतिपुष्पाणिधूपंचोमासुतेतिच॥ दीपंरुद्रप्रियायेतिनैवेद्यं
विघ्ननाशिने॥ वस्त्रंसर्वप्रदेरक्तंयुग्मंदद्यात्सुभावितः॥ ततोदूर्वांकु
रान्गृह्यविंशतिंचैकमेवच॥ पूजनीयःप्रयत्नेनएभिर्नामपदैःपृथ
क्॥ तानिवक्ष्यांतेदूर्वायुग्मंगृहीत्वातुगंधयुक्तंप्रपूज्यते॥ येन॥ ए
केकेनाम्नावैदत्वैकंसर्वनामभिः॥ तथैकविंशतिर्गृह्यमोदकान्घृत ३२
पाचितान्॥ स्थापयित्वागणाध्यक्षसमीपेकुरुनंदन॥ दशविप्राय

दातव्यास्तुपंचाद्यास्तथादश॥ एकंगणाधिपेदद्यात्सनैवेद्यंनृपोत्त
म॥ विप्रायभोजनंदद्यात्कुंजीयात्तैलवर्जितमिति॥ अत्रचतुर्थीमध्या
ह्नव्यापिनीग्राह्याः॥ प्रातःशुक्लतिलैःस्नात्वामध्याह्नेपूजयेन्नृपेतिस्कं
दपुराणेमध्याह्नस्यकर्मकालत्वाभिधानात्॥ चतुर्थीगणनाथस्य
मातृविद्धाप्रशस्यते॥ मध्याह्नव्यापिनीसातुपरतश्चेत्परेहनीतिवच
नाच्च॥ अत्रपरतःश्चेदितियदिनएवमध्याह्नव्यापित्वेपरा॥ अन्यथा
सर्वपक्षेषुपूर्वा॥ मातृयोगस्यप्रशस्तत्वात्॥ अस्यांचंद्रदर्शनंनक
र्तव्यं॥ तथाचमार्कंडेयः॥ सिंहादित्येशुक्लपक्षेचतुर्थ्यांचंद्रदर्श

नं॥ मिथ्याभिदूषणं कुर्यात्तस्मात्पश्येन्न तं सदेति॥ पराशरः॥ कन्यादित्ये चतु
र्थ्यां शुक्ले चन्द्रस्य दर्शनं॥ मिथ्याभिदूषणं कुर्यात्तस्मात्पश्येन्न तं तदा॥ दो
षशान्तये सिंहः॥ प्रसेनमिति वै पठेत्॥ अत्र सिंहादित्य कन्यादित्य
शब्दाभ्यां चान्द्रो भाद्रपद उपलक्ष्यते॥ श्लोकस्तु विष्णुपुराणे॥ सिंहः प्र
सेनमवधीत्सिंहो जाम्बवता हतः॥ सुकुमारक मा रोदीस्तव ह्येष स्यमं
तक इति॥ भाद्रपद शुक्लपंचमी ऋषिपंचमी सा सामान्यनिर्णयात्पूर्वा
ग्राह्या॥ तत्र भाद्रपद शुक्लसप्तमी पूर्वविद्धा ग्राह्या॥ षण्मुन्योरिति
युग्मवाक्यात्॥ उत्तरत्रैव मध्याह्नव्यापित्वे उत्तरा मनुष्यदैवत्ये तेन 32

मध्याह्नकालत्वात्॥ तस्यामेव सप्तम्यां आमुक्ताभरणव्रतं कार्यं॥ भाद्र
शुक्लाष्टमी दूर्वाष्टमी॥ सा च पूर्वविद्धा ग्राह्या॥ श्रावणी चैव दुर्गनवमी
दूर्वा चैव हुताशनी॥ पूर्वविद्धैव कर्तव्या इति बृहस्पतिवचनात्॥ शुक्लाष्टमी
तिथिर्या तु मासि भाद्रपदे भवेत्॥ दूर्वाष्टमी तु सा ज्ञेया नोत्तरा सा विधीय
त इति हेमाद्रावुदाहृते पुराणसमुच्चयवचनाच्च॥ इदं च दूर्वाव्रतं ज्येष्ठा
मूलनक्षत्रयोग रहितायां सिंहस्थे सूर्ये अगस्त्ये उदिते मध्याह्नव्यापिन्यां क
र्तव्यं॥ शुक्ले भाद्रपदे मासि दूर्वासंज्ञा या तु अष्टमी सिंहार्क एव कर्तव्या न क
न्यार्के कदाचन॥ सिंहस्थे सोऽन्यमासे यदि उदिते मुनिसत्तम इति स्कान्दात्॥ अ

गस्य उदिते तात प्रजयेद स्त तोऽध्वं॥ वैधव्यं पुत्रशोकं च दशवर्षाणि पंच
चेति तत्रैव दोषाभिधानाच्च॥ हेमाद्रौ ज्योतिःशास्त्रेऽपि॥ उद्यापनिकाश्चि वर्षं वि
त्रकमेघजा दुर्वाष्टमीफलविरुद्धकजागराणि॥ स्त्रीणां व्रतानि निखिला
न्यपि वार्षिकाणि कुर्यादगस्त्य उदिते नं प्रथमानि लिप्सुरिति॥ मुहूर्तशिरोदि
पोऽप्याः सर्वाचार्यादिवापरा। दूर्वाष्टमी तु सा कार्या ज्येष्ठां मूलं च वर्जये
दिति पुराणसमुच्चयवचनाच्च॥ तथा लिंगे दूर्वे प्रजिता दूर्वाहिं त्यपि स्यान्निना
न्यथा॥ ऋतुरासु ईतामूले तस्मात्तां परिवर्जयेदिति निषेधाच्च॥ इदं च स्त्री
णां नित्यं यानसृजमते दूर्वामिता दिर्व्यया विधीः त्रीणि जन्मानि वैधव्यं

33

लभते नात्र संशय॥ तस्मात्तं पूजनीया साम्प्रति वर्षे व धूजनैः॥ सुखसं
तानजननी भर्तुः सौख्यकरी स देति पुराणसमुच्चयोक्तेः॥ तेन सर्वा नि
त्यत्वाच्च॥ यस्मिन्वर्षे ज्येष्ठामूलयोगरहिता याऽलाभस्तत्राप्युक्त
स्य नानुष्ठानं न तु सर्वथा त्यागः॥ अनुकल्पश्च कर्त्तव्यो लोकं तु क्रेन ले
षा मुख्य यदा न वेत॥ दूर्वामभ्यर्च्य यत्नेन वंदिव संनयेत॥ इति तंत्रे
वोक्तः॥ ज्येष्ठामूलग्रहणं निषिद्धकालमात्रोपलक्षणं तत्राप्यपेक्षासला
त॥ अन्न कर्त्तव्यमुक्तं मदनरत्ने नविष्ण्य॥ शुचौ देशे प्रजातायां दूर्वायां
= स्याज्येष्ठामूलात्यतर योगे उत्तराऽपि तद्रहिता कर्मकालस्य शिनी दूर्वाव्रते ग्राह्या =

त्रालेलोत्तमा॥ स्थाप्य लिंगं ततो गंधैः पुष्पैर्धूपैः समर्चयेत्॥ दद्यात्ततोर्द्धं
श्रेष्ठमर्घ्यं दद्यात्त्रिलोचने॥ दूर्वाशमीत्यां विधिवत्पूजयेद्भक्त्यान्विता॥ मं
त्रस्तु॥ त्वं दूर्वेमृतजन्मासि वंदितासि सुरासुरैः॥ सौभाग्यं संततिं देहि सर्व
कार्यकरी भव॥ यथा शाखाप्रशाखाभिर्विस्तृतासि महीतले॥ तथा
ममापि संतानं देहि त्वमजरामरे॥ अत्र अनग्निपक्वं न खादयेत्॥ अनग्नि
पक्वमश्नीयाद्दधिक्षीरं तथा॥ अत्राहारत्वेनाश्रीयान्न धृताग्नि
तमिति॥ अत्र निषिद्धयोगाभावे स्त्रीभिः स्वयं दूर्वा सिंचन्त्य अनग्निप 38
क्वन्नाणं कार्यं॥ तद्योगे ब्राह्मणद्वारा पूजां कारयेत्॥ एकभक्तं कार्य

22

मिति॥ अस्यामेव ज्येष्ठापूजा कार्या॥ कन्यास्थार्के ष्टमी शुक्ला ज्येष्ठ
र्क्षे महती स्मृता॥ अष्टमी वरिष्ठा ज्येष्ठां तत्र प्रपूजयेदिति लैंगपुराण
त्॥ अन्यास्यार्कयोगेन प्राशस्त्यमाह॥ मासस्तु भाद्रपदस्थांद एव॥
अष्टाष्टम्याः खंडत्वे ज्येष्ठायुता पूर्वा परा वा ग्राह्या॥ यत्तु ज्येष्ठानक्षत्र
मात्रापेक्षं तिथिव्रतादिनं ज्येष्ठापूजारूपं व्रतं तत्र यस्यां तिथौ ज्येष्ठानक्ष
त्रं भवति तस्यां कर्तव्यं ज्येष्ठा देवीं प्रपूजयेदिति॥ स्कांदपुराणात्॥ यस्मि
न्कस्मिन्दिने यस्यां कस्यां चिति थ्यां विलक्ष्यः॥ ज्येष्ठानक्षत्रस्य खंडत्वे अ
ष्टमीलाभानुरोधयुगन्य तत्र मुख्या ज्येष्ठानक्षत्रं ग्राह्यं॥ तत्राष्टम्यां यदा वा

रोज्ञाने ज्येष्ठर्क्षमेव च ॥ नीलपृष्ठेति सा प्रोक्ता दुर्लभा वृश्चिकालिके ति स्कं
दपुराणात् ॥ अन्यतरयोगस्याप्यभावे मध्याह्नादूर्ध्वमनुवर्त्तमानं ज्या
ह्यं ॥ यस्मिन् दिने नवे ज्येष्ठा मध्याह्नादूर्ध्वमप्यणुः ॥ तद्दिने न्हविषयं प्रज्ञा
वा ॥ न्यूना चेत्पूर्ववासर इति ॥ स्कांदात् ॥ तथा ॥ मंत्रस्तु ॥ ज्येष्ठायै ते नमस्तु
मैत्रेण वाह्ये देवीं ज्येष्ठायां तु प्रसृज्येत् ॥ मूले विसर्जये देवीं त्रीदिनं व्रत
मुत्तममिति । मंत्रस्तु ॥ ज्येष्ठायै ते नमस्तुभ्यं ज्येष्ठायै ते नमो नमः ॥ शार्वायै ते
नमस्तु शाकंर्यै ते नमो नम इति ॥ अस्यामेव महालक्ष्मीव्रतारंभः ॥ तत्र
सा ज्येष्ठायुता ग्राह्या । तदुक्तं विवेके ॥ भाद्रशुक्ल द्वादश्यां श्रवणयो ३५

गे पारणं न कार्यं ॥ आषाढासितेपक्षेष्वधिति सर्वो द्वाहते वचनात् ॥ तपोच्ये
काद्दशीमोहासारणं श्रवणे यदि ॥ करोति हंति तत्पुण्यं द्वादशद्वादशीजं वमि
तिस्कांदात् ॥ अत्रैव चैत्रे धा विभक्त श्रवण मध्यभागे पारणं वर्ज्यमि
त्युक्तं विष्णुधर्मे श्रुते श्रममध्ये परिवर्त्तमेति ॥ सुप्तिप्रबोधापरिवर्त्तनमेव च
ज्यमिति ॥ अत्रैव परिवर्त्तनोत्सवं कुर्यात् ॥ श्रुते श्रममध्ये परिवर्त्तमेतीति
वाक्यात् ॥ अत्रैव शक्रध्वजोत्थापनमुक्तं परार्केमतरेण ॥ द्वादश्यां तु सि
ते पक्षे मासि प्रोष्ठपदे तथा ॥ शक्रमुत्थापयेद्राजा विश्वश्रवणवासवे ॥
द्वयमेव श्रवण द्वादशी ॥ अस्य श्रवणस्य श्रवणयोगे पि तन्निमित्तमुपवा

सा द्दिन्नवति॥ तदुक्तं मात्स्ये॥ द्वादशी श्रवणस्पृष्टा कृत्स्ना पुण्यतमा तिथिः॥ न
तु सा तेन संयुक्ता अवत्यव प्रश्नस्य स्पतइति॥ तत्र एकस्मिन्नेव दिने श्रवणयो
गे मैव श्रवणयुता सैव ग्राह्या॥ विद्धाधिकाया दिनद्वयेपि श्रवणयोग एका
दशीयुता ग्राह्या॥ द्वादशी श्रवणस्पृष्टा स्पृशेदेकादशीं यदा॥ स एव वैष्णवो
योगो विष्णुशृंखलसंज्ञितः॥ उपोष्य विधिवत्तत्र नरः संक्षीणकिल्बिषः॥
प्राप्नोत्यनुत्तमां सिद्धिं पुनरावृत्तिदुर्लभामिति मत्स्यपुराणात्॥ तथा नारदी
ये॥ संस्पृशेदेकादशीं नारुराजन्द्वादशीं यदि संस्पृशेत्॥ श्रवणं ज्योति
षां श्रेष्ठं ब्रह्महत्यां व्यपोहति॥ तत्रैव च तदेकादशी द्वादशी प्रयुक्तमुप ३९

पवासद्वयं॥ शुद्धाधिकाया दिनद्वयेपि श्रवणयोगे उदये तद्योगवती ग्राह्या
उदयव्यापिनी ग्राह्या॥ श्रवणद्वादशीव्रतइति ब्रह्मवैवर्तीयात्॥ एतदु
येकादशी व श्रवणयुक्ता न द्वादशी तदा तस्यामपि व्रतं भवति॥ यदा न सप्प
ते ऋक्षं द्वादश्यां वैष्णवं क्वचित्॥ एकादशी तदोपोष्या पापघ्नी श्रवणान्विता इति
नारदीयात्॥ विद्धाया एव श्रवणयोगे विद्धापि ग्राह्या॥ दशम्येकादशी यत्र
सा नोपोष्या भवेत्तिथिः॥ श्रवणेन तु संयुक्ता साप्युज्ज्यो॥ सर्वकामदेति वह्नि
पुराणात्॥ इयं च बुधवारेऽतिप्रशस्ता॥ अत्र व्रते काम्यं नित्यं नैमित्तिकेचि
त्॥ पारणे तु नयांतो मुख्यः॥ अन्यतरांतो गौणः॥ अत्र व्रते काम्ये विशेषो मत्स्ये

स्कयः॥ कन्यागतान्वितश्चेत्स्यात्सकलः श्राद्धकर्मणीति॥ चेदित्यसंदिग्धे संदिग्ध वचनं। तिथौ को उश्रा ९

संगमस्नानादिकार्यं ज्ञात्वपदेश्रवणैकादश्यां मध्याह्ने वामनावतारः॥ तन
वामनस्य जाप्रतिमा दानादिकं व्रतकाले द्रष्टव्यं॥ अस्यामेव दुग्धव्रतसंक
ल्पः॥ दुग्धव्रते पायत इति॥ एतच्च निर्णयामृत वृत्तिमुक्तेः॥ एतच्च पारणे
विधानेन कार्यं॥ अथ महालयः॥ तत्र पंचपक्षाः॥ कृष्णप्रतिपदादिस्तु
कृष्णप्रतिपदांत एकः॥ प्रतिपदादिदर्शांतो द्वितीयः॥ पंचम्यादिस्त्वष्टम्यादि
दशम्यादि चतुर्दशीवर्जं दर्शांतमित्यपरे॥ दर्शांसरेपक्षे तिथिषोडशकं
श्वमावास्यांतं प्रतिपदमायो हातिदेवलेनोक्तं॥ अहः षोडशकं य
तु शुक्लप्रतिपदा सहाह॥ चंद्रक्षयादि विशेषेण सापि दर्शालिकास्मृता ३७
स पंचतिथिपक्षाः॥ एकदिनपक्षश्चेति तत्र प्रथमपक्षमाहणायायतिः॥ नभस्यस्याप

येतेतिपंचदशास्मप्तपंचतिथिपक्षाः ब्रह्मपुराणे॥ आश्वयुक्कृष्णपक्षे तु श्रा
द्धं कुर्याद्दिने दिने॥ त्रिभागहीनपक्षं वा त्रिभागं त्वर्द्धमेव वेति॥ तत्रीयोत्रा
गस्त्रिभागः१ ह्रस्वतद्दीनता आह्यानां चतस्रणां चतुर्दश्यां च वर्जनात्
एवमर्द्धत्रिभागयोरपि चतुर्दशी वर्जनं॥ नभस्यस्यापरेपक्षे श्राद्धं कुर्या
द्दिने दिने नैव नंदादि वर्जं स्यान्नैव वर्ज्याच सारिकं वर्ज्यं। दधिघृताद्य
स्तद्धिकारास्तथा ह्य एव॥ नाम्नृत्कृष्णचतुर्दश्यामनंतव्रतं॥ तत्र सर्वाह्न
व्यापिनी ग्राह्या॥ दैवकर्मत्वात्॥ चतुर्दश्या च पूर्णिमेति युग्मवाक्या
च्च॥ केचित्तु मध्याह्ने भोज्यवेलायामिति तत्कथायां श्रवणान्मध्याह्नव्या

विनीयाद्येतिवदंति। तस्य दूषणमन्यत्र मलकेतोऽदृष्टत्वं॥ सिंहसंक्रांतिदिनमारभ्य
चत्विंशतिमे दिनेऽगस्त्योदयः॥ तदुक्तं दिवोदासीये॥ उदेति याम्यां हरिसंक्र
माद्वेदैकाधिके विंशतिमे ह्यगस्त्य इति॥ तत्र काशपुष्पमयी॥ अगस्त्यप्रतिमां
संपूज्य अगस्त्यः॥ खनमान इत्यनेन अर्घ्यं दद्यात्। हेमाद्रिव्रतकांडे स्पष्टं॥ भा
द्रपदपौर्णमास्यां प्रतितामहात्परां स्त्रीनुद्दिश्य श्राद्धं कार्यं॥ तदुक्तं मार्कंडेय
पुराणे॥ नांदीमुखानां प्रत्यब्दं कन्याराशिगते रवौ पौर्णमास्यां तु कर्तव्यं वरा
हवचनं यथेति॥ नांदीमुखत्वं दर्शितं तत्रैव पिता पितामहस्तथैव तथैव प्रपिता
महाः॥ त्रयो ह्यश्रुमुखा ह्येते पितरः परिकीर्तिताः॥ तेभ्यः पूर्वतरा ये च प्रजा ३८
वंतः सुखेधिताः॥ ते तु नांदीमुखा नांदीसमृद्धिरिति कथ्यते तु दर्शीतिकत्व

नेन प्रतिपदादिपक्षे एव चतुर्दशीवर्जननिषेधादितरपक्षेषु तद्वर्जनप्रतीतेः
नंदादिवर्जनं तु न भवति संख्याहानिप्रसंगात्॥ गौतमः॥ अथापरपक्षश्रा
द्धं पितृभ्यो दद्यात् पंचम्यादि दर्शांतं अष्टम्यादि दशम्यादि सर्वस्मिन्नपि वास
रे॥ तस्यश्चेमरखंडे आगमपद्याः पंचमेप कन्यासंस्थे दिवाकरे॥ यो वै
श्राद्धं नरः कुर्यादेकस्मिन्नपि वासरे॥ तस्य संवत्सरं यावत्तृप्ताः स्युः पि
तरो ध्रुवमिति॥ अस्मिन्पक्षे नंदादिवर्जनमपि न भवति॥ अत नंदप्रवृत्तौ का
रणाभावात्॥ नंदादिवर्जनमाह नारदः॥ नंदासु भृगुवारे रोहण्यां च त्रि
जन्मसु॥ रेवत्यां च मघायां च कुर्याद्दापरपक्षिकमिति॥ नंदाः प्रतिपत्त

ष्ठीकादशी ॥ त्रिजन्मानि ॥ अथ दशमैकोनविंशति नक्षत्राणीयत्तु कर्तुः
स्वपुत्रदाराणां त्रिजन्मर्क्षाणि वर्जयेदिति च्यवनात् तत्र शाद्रिसाकरतदेवं
आरभ्य यवर्तः पुत्रदाराणां चयानि त्रीणी जन्मर्क्षाणि आद्य दशमैको
नविंशानि तानि वर्जयेदिति ॥ अन्यथात्र शाद्वस्य बहुवचनस्यत्रवै
यर्थ्यात् ॥ केचित्तु त्रिजन्मानी त्यत्र जन्मतत्पूर्वोत्तरनक्षत्राणीति व्या
रव्यातं तत्पूर्वोत्तर नक्षत्रयोर्जन्मशब्द वाच्यात्वाभावादुपेक्षितं ॥ अ
न्यत्रापि ॥ दत्तान्यकाम नौगेष्वष्टगवघ्निपितृकालान्नेगंडे वैधृतिपा
ते च पिंडास्त्याज्याः सुते सुप्तिरिति ॥ अथ सप्तमी ॥ कामस्त्रयोदशी ३२

आरोग्योमः नगुस्युक्तः ॥ अग्नि ॥ कृत्तिका पितृकालय यत्नेमघा ज्ञरणी
पिंडदानग्रहणं आक्षेप लक्षणमेव एकमूलकल्पनाघवत् ॥ अस्याप
वादः ॥ प्रयोगपारिजाता दिना हृतेसंग्रहवचने ॥ अमापाते ज्ञरण्यां च
पादद्वयं पक्षमध्ये कतिथिं वारंच नक्षत्रं योगंच वर्जिवारयेदिति ॥ म
तितिथि समानजातीयायामपि चतुर्दशी भिन्नायां तिथौ निषेधप्रयो
जकयुक्तायामपियावत्सं नवैशिष्टा महालयश्राद्ध माचरंति ॥ आधु
निकग्रंथे क्वचनान्यापि लिखितानि ॥ नागरखंडे ॥ आषाढ्या पंच
मेपक्षे कन्यासंस्थे दिवाकरे ॥ मृताहनि पितुर्यो वै श्राद्धं दास्यति मा

नवः॥ तस्य संवत्सरं यावत्सं तु ह्यपितरो ध्रुवं॥ कात्यायनः॥ यातिथिर्य
स्य मृताहे तु प्रवर्त्तते॥ सा तिथिः पितृपक्षे तु पूजनीया प्रयत्नतः॥ त
थाश्वलायनः॥ पक्षमध्ये तु करोत्येव दिने यादानि विद्धेपि दिने कुर्यात्पिं
डदानं यथाविधि॥ तथा मार्कंडेयः॥ कन्यागते सवितरि दिनानी दश
पंच च॥ पार्वणेनैव विधिना श्राद्धं तत्र विधीयते॥ अशक्तौ विवाहे वितते
मासांस्त्रज्येयुक्तदिनैर्वहि॥ सपिंडः पिंडनिर्वापं मौंजीबंधेषु उद्वाहेहि ति
विवाहानंतरं पिंडदाननिषेधो ज्योतिःपराशरोक्तेः॥ तस्यापवादः स्म
तिसंग्रहे॥ महालये गयाश्राद्धे मातापित्रोर्मृतेहनि॥ यस्य कस्यापि म ४०

र्त्यस्य सपिंडीकरणे तथा॥ कृतोद्वाहोपि कुर्वीत पिंडनिर्वपणं सुतः इ
ति सर्वदा॥ सिका तु महालयश्राद्धं द्वादश्यां कर्त्तव्यं॥ यतीनां च वनस्था
नां वैष्णवानां विशेषतः॥ द्वादश्यां विहितं श्राद्धं व्यापक्षे विशेषत इति
पृथ्वीचंद्रोदये संग्रहोक्तेः॥ इदं चान्नेनैव कर्त्तव्यं मृताहं च सपिंडं च गया
श्राद्धं महालयं॥ आपन्नोपि कुर्वीत श्राद्धमामेन कर्हिचित् इति स्मृति
दर्पणे महालयोक्तेः॥ अत्र देवताः॥ पितरो यत्र पूज्यंते यत्र मातामहास्त
पि॥ तथा॥ अन्वष्टकासु वृद्धौ च प्रतिसंवत्सरं तथा॥ मातामहालये
गयायां च सपिंडीकरणे तु रा॥ मातुः श्राद्धं पृथक् कुर्यादन्यत्र पतिना

सप्तौ॥ हेमाद्रौ॥ महालये गयाश्राद्धे वृद्धौ चान्वष्टकासु च॥ नवदैवतमत्रेष्ट
टपौरुषं विदुरिति सपत्नमातृस्त्वमात्रा सहैकतंत्रेणं द्विपितृकश्राद्धतन्नि
गमे॥ महालये गयाश्राद्धे चान्वष्टकासु च॥ ज्ञेयं द्वादशदैवत्यं तीर्थे प्रो
ष्ठपद्यासु च॥ तथा हेमाद्रौ॥ उपाध्यायगुरुश्वश्रूपितृव्याचार्यमातुलाः॥
श्वसुरभ्रातृतत्पुत्रऋत्विक्शिष्याप्तपोषकाः॥ भगिनीस्वामिदुहितृन्भ
मातृभगिनीसुताः॥ पितरौ पितृपत्नीनां पितृमातृष्वस्रयाम्बसा॥ सखिव
द्रव्यदशिष्याद्यास्तीर्थे चैव महालये॥ एकोद्दिष्टविधानेन पूजनीयाः॥
प्रयत्नतः इति॥ नातां वेति संग्रहवाक्यं तु कर्षिकवचनसंवादान्नादरत्नं॥ ५१

अत्र प्रत्येकोद्दिष्टं ब्राह्मणभेद इति सुरम्यापन्नः॥ अशक्तौ चतुर्विंशतिम
ते॥ एकस्मिन् ब्राह्मणे सर्वानाचार्यादीन्प्रपूजयेत्॥ दशद्वादश वा पिंडा
न्दद्यादकरणं न तु॥ सांव॥ माधवार्यास्तु विशेषः स्मृतिसंग्रहे चत्वारि
पार्वणानीह विधवायाः॥ सदैव हि स्वतन्त्रश्वशुरादीनां तापित्रोस्तथैव
च॥ ततो मातामहानां च श्राद्धदानमुपक्रमेति॥ तथा॥ श्वश्वशुराणां च विशे
षेण मातामह्यास्तथैव चेति॥ असक्तौ स्मृतिरत्नावल्यां॥ स्वतन्त्रप्रकृति
त्रिभ्यः स्वपितृभ्यः स्तथैव च॥ विधवा कारयेच्छ्राद्धं यथाकालमतंद्रिता वि
धवा स्वयं संकल्पं कुलाऽन्यद्वारा कारयेदित्युक्तं प्रयोगपारिजाते॥ अ

त्रैवैकः पाकः वैश्वदेवं तंत्रं॥ एकोद्दिष्टप्रपाणितोमः॥ पुरूरवार्द्रवो विश्वे
देवौ॥ यत्तु/अपि कन्यागते सूर्ये श्राद्धेतु धुरि लोचनाविसादि पुराणव
चनं तत्काम्यबुधाप्या क्रियमाणमहालयश्राद्धविषयमिति मदनरत्न
मदनपारिजातादयः॥ अत्र च प्रतिदिनं प्रयोगभेदाद्दक्षिणाभेदः॥
यत्तु हेमाद्रिणा न्यासपक्षे तेदक्षिणादानमित्युक्तं। तत्कर्मैकोपि प्रति
दिनं प्रयोगभेदात् दक्षिणायाश्च प्रणेगांगत्वादमुक्तं॥ एतच्च भ्रुवीणी
पतिनापिंडरहितं श्राद्धं कार्यं॥ तथाच दक्षः॥ मुंडनं पिंडदानं च प्रेतक
र्मच सर्वशः॥ न जीवत्पितृकः कुर्याद्गुर्विणीपतिरेव चेति॥ जीवत्पितृक ४२

४२
स्याचैतेष्टकप मातृवार्षिकादौ वचनाद्भवति॥ अपिंडकश्राद्धे विशेषमा
ह कामलेयः॥ पिंडो यत्र निवर्तेत मघादिक कथंचन सांकल्पं तु तदा का
र्यं तियमाद्भूत्वा दिनि॥ श्राद्धांगतर्पणं तुप द्वश्राद्धे श्राद्धोत्तरं संकल्प म
हालये तु परदिने॥ तदुक्तं नारदीये॥ पक्षश्राद्धं तु यः कुर्यात्तर्पणं तु दि त
ने॥ सकृन्महालये चैव परेह्नीति लोदकमिति॥ प्रयोगपारिजाते ग
र्गः॥ कृष्णपक्षे प्रतिपदे मासि श्राद्धं प्रतिदिनं भवेत॥ पितॄणां प्रत्यहं का
र्यं निषिद्धेपि च तर्पणं— तच्च श्राद्धं नीत्यं श्रापाढ्याः पंचमे पक्षे यः श्रा
द्धं न करिष्यति॥ शाकेनापि दरिद्रोपि सोंत्यजत्वामुपेष्यति॥ श्रास

मंत्रायनं जोज्यं स्पर्शनं भाषणं तथा॥ तेन सार्द्धं करिष्यंति ये ते पापतरा नरा
इति नागरखंडे॥ अकरणे प्रत्यवायश्रवणात्॥ काम्यं च॥ पुत्रानायुस्तथा॥
रोग्यमैश्वर्यमतुलं तथा॥ प्राप्नोति पंचमे दत्वा श्राद्धं कामांश्च पुष्कलानिका
र्ष्णाजिनिवचनात्॥ यत्तु॥ यातुधानप्रियामासः॥ कन्यार्को दृश्यते यदा॥
दैवं पित्र्यं तदा कर्म उत्तरे मासि युज्यत इति वचनं तदाश्विने धिमासे तत्र
लोपे कालप्राप्तस्य महालयश्राद्धस्यापकर्षार्थं॥ पितृमरणप्रथमाब्दे
तु कृताकृतं॥ अत्र मरणपक्षश्राद्धमतिप्रशस्तं अपरलिपितृपक्षे तु मह
ति परिकीर्तिता॥ तस्मात् श्राद्धं कृतं येन सगया श्राद्धकृद्भवेदिति मात्स्ये ४२

त॥ पृथ्वीचंद्रोदये मन्नस्यां श्राद्धं परपक्षस्याद्वितीयायां यदि यन्नपते॥ तृतीया
त्वग्नितारा भिः सहिता प्रतीते दानीतु रिति॥ अस्मिन्नेव पक्षे कपिलाष
ष्ठी॥ तदुक्तं वाराहे नभस्यस्यापरे पक्षे तु रोहिणी पातसूसुतैः॥ युता षष्ठी
पुराणज्ञैः कपिला परिकीर्तिता॥ व्रतोपवासनियमैः भास्करं तत्र पूज
येत्॥ कपिलां च द्विजायाथ दत्वा क्रतुफलं लभेदिति॥ अत्रैव हस्तार्कि
फव्या तिरश्रायइति निर्णयामृते॥ इयमेव चंद्रषष्ठी॥ तदुक्तं भविष्ये॥ च
द्रोदये मासि षष्ठ्यां पक्षे सिते तरे॥ चंद्रषष्ठी इवाख्याता परे हनि॥ चं
द्रषष्ठ्यां सिते पक्षे सेवोपोष्या प्रयत्नतः इति॥ अत्रैवाष्टम्यां माघ्यस्त्वा लाय

नः॥ यत्नेनमाघमावर्षसंज्ञंश्राद्धमुक्तं॥ -- माघमावर्षप्रोष्ठपद्यास्त्वप
रपक्षेमासिमासिचैवमिति॥ इदंचसप्तम्यादित्रिष्वहःसुअष्टकावत्कार्य
मित्युक्तिकृत॥ हरदत्तस्तु॥ मघायुक्तवर्षाकृत्त्वंत्रयोदशीश्राद्धमिति
व्याचख्यौ॥ अत्रैवाष्टम्यांमहालक्ष्मीव्रतसमापनं॥ तत्रचंद्रोदयव्यापि
नीग्राह्या॥ तत्कालेचंद्रार्घ्यदानविधानात्॥ चंद्रोदयव्रतवेमनचंद्रोद
यव्रतेचैवतिथिस्तात्कालिकीस्मृतेतिवचनात्॥ उभयत्रचंद्रोदये
सत्वेऽसत्वेवाकृष्णत्वात्सर्वा॥ यद्युत्तरदिनेचंद्रोदयोत्तरंत्रिमुहूर्त्ता
तदोत्तरैव॥ पूर्वाविद्यापराकदाग्राह्या॥ चंद्रोदयेतुयात्रिमुहूर्त्तापिसा ४४

पूज्यापरतश्चोर्ध्वगामिनीतिपुराणसमुच्चयवचनात्॥ अर्द्धरात्रम
तिक्रम्यवर्त्ततेयात्ररात्रितिथिः॥ तदातस्यांतिथौकार्यंमहालक्ष्मीव्र
तंसदेतिवचनाच्च॥ अत्रैवनवम्यामन्वष्टकाश्राद्धंतत्रकालाप
नः॥ अन्वष्टकासुनवभिःपिंडैःश्राद्धमुदाहृतं॥ पित्रादिमातृमध्यंच
ततोमातामहांतकं॥ हेमाद्रौछागलेयः केवलास्त्वष्टकायविद्यावा
दोषप्रकीर्त्तिताः॥ अन्वष्टकासुमध्यस्यानोक्ताःकार्याःकदाचनेतिदीपि
कायांतुमातुःश्राद्धमादौकार्यमित्युक्तं॥ निर्णयामृतेमैत्रायणीयपरत्वाप
रिशिष्टेअन्वष्टक्यंगयाश्राद्धेसत्यांयच्चमृतेऽहनि॥ मातुःश्राद्धंसुतःकु

र्यातितयापि च जीवति॥ यद्यपि च जीवति॥ यद्यपि जीवत्पितृकस्य पंचा
प्यन्वष्टकानित्यास्तथाप्याचारादशक्तस्य मावस्यकीति केचित्॥ माता
महस्य चरलेस्तु नवस्यां क्रियमाणं मातृश्राद्धं प्रतिपदि क्रियमाणं मातामहश्रा
द्धं च महालयापरपक्षनिमित्तमेवेति कालतत्वविवेचने सोपपत्तिकमुक्तं
अत्र सवमातरि जीवंत्यामपि सपत्नमातृभ्यो दद्यात्॥ सर्वासामेव मातॄणां
श्राद्धं कन्यागते रवौ॥ नवम्यां हि प्रदातव्यं ब्रह्मलब्धवरा हि ताइति क
चिद्लिखितवचनं सर्वासामित्युक्तं॥ अत्र सर्वासां नाम निर्देशेन एको र्घः
पिंडश्च नामैक्यं तु द्विवचनादि प्रयोग इति वृत्तिकारः॥ भर्तृमरणोत्तरं ४९

मातुः श्राद्धं न कार्यं॥ श्राद्धं नवम्यां कुर्यात् न्मृते भर्तरि लुप्यत इति वचना
दिति केचित्तु॥ अन्ये तु॥ एतद्वचनस्य निर्मूलत्वात्कर्तव्यमित्याहुः॥ माताम
हावरणस्तु मृतपितृकेणापि तच्छ्राद्धादिकं रहिन एव पृथक्पृथग्वा मातृत
स्तेरपि संपादितत्वान्न कर्तव्यमित्याहुः॥ सर्व चैतत्कालतत्वविवेचने
स्पष्टं॥ इदं च जीवत्पितृकेणापि सपिंडकं कार्यं॥ हेमाद्रौ विष्णुधर्मोत्तरे॥ अ
न्वष्टकासु च स्त्रीणां श्राद्धं कार्यं॥ तथैव चैत्रेषु पक्षस्य पिंडनिर्वपणं कार्य
मित्युक्तत्वात्॥ अत्रापि॥ देशादेवपिंडदाने प्रा। जीवत्सीतृकत्वादि
प्रयुक्तनिषेधप्रतिप्रसवार्थं वचनं॥ अत्र सुवासिनिभोजनमुक्तं॥ मा

र्कंडेयपुराणे॥ मातुः श्राद्धे तु संप्राप्ते ब्राह्मणैः सह भोजनं॥ सुवासिन्यै प्र
दातव्यमिति शातातपोऽब्रवीत्॥ भर्तुरग्रे मृता नारी सह दाहेन वा मृता॥
तस्याः स्थाने नियुंजीत विप्रैः सह सुवासिनीमिति॥ तत्रैव मजलसावा
कं॥ स्त्रीश्राद्धेषु च देयाः स्युरलंकाराश्च योषितः॥ मंजीरमेखलादाम
कर्णिकाकंकणादिय इति॥ अत्रैव त्रयोदश्यां श्राद्धं मत्तलयं॥ माघयु
क्तायां तु अतिप्रशस्तं॥ अत्र मलमासेऽपि श्राद्धं कार्यं॥ अनन्यगतिक
त्वेन कर्तव्यस्यामलिम्लुच इति काठकगृह्योक्तेः॥ इदं च युगादिविशेष
प्रयुक्तत्वात् पिंडरहितं कार्यं॥ अयने द्वितये श्राद्धं विषुवद्द्वितये तथा ४९

था॥ युगादिषु च कर्तव्यं पिंडनिर्वपणादृत इति वचनात्॥ एतच्च पुत्रवता पु
त्रं॥ नक्षत्रोद्देशेन न कार्यं॥ अविभक्तोऽपि पृथक् कार्यं॥ तथा च हेमाद्रौ
विभक्ता वा विभक्ता वा कुर्युः श्राद्धं पृथक् सुताः॥ मघासु च ततोऽन्यत्र ना
धिकारः पृथग्वीदिने इति॥ नित्यं चात्र श्राद्धं॥ प्रोष्ठपद्यामतीतायां तथा कृ
ष्णत्रयोदशीत्युपक्रम्य एतानि श्राद्धकालानि नित्यानाह प्रजापतिः॥ श्राद्ध
मेतेष्वकुर्वाणो नरकं प्रतिपद्यत इति विष्णुधर्मोत्तरात्॥ इयमेव योगविशे
षेण गजच्छाया॥ तदुक्तं ब्राह्मे॥ योगो मघात्रयोदश्योः कुंजरच्छायसंज्ञ
कः॥ भवेत मघायां संस्थे च शशिन्यर्के करे स्थित इति॥ अस्मिन्नेव पक्षे

चतुर्दश्यां दुर्मरणमृतानां श्राद्धं कार्यं तथा च मरीचिः ॥ विषःसर्वःश्वापदा
हितिर्यग्ब्राह्मणघातिनां ॥ चतुर्दश्यां क्रिया कार्या अन्येषां तु विगर्हितेति ॥
नागरखंडे ॥ अपमृत्युर्भवेद्येषां शस्त्रमृत्युरथापि वा उपसर्पमृतानां च वि
षमृत्युमुपेयुषां ॥ वह्निना च प्रदग्धानां जलमृत्युमुपेयुषां ॥ सर्पव्याघ्रहता
नां च शृंगैरुद्बंधनैरपि ॥ श्राद्धं तेषां प्रकर्तव्यं चतुर्दश्यां निराधिपेति ॥ मा
र्कंडेयपुराणे ॥ युवानः पितरो यस्य मृताः शस्त्रेण वा हताः ॥ तेन कार्यं च
तुर्दश्यां तेषां तृप्तिमभीप्सतेति प्रयोगान्तरायनाज्यां तु विधिनापि मृता न
भवति ॥ प्रयोगे च शान शस्त्राग्निविषोद्बंधनिनां तथा ॥ चतुर्दश्यां भवेत्का ४७

लमिति ब्रह्मपुराणात् ॥ युद्धे मृतानां वा ॥ श्रीयं ते पितरस्त्वामिमेव शस्त्रहता
ण इति कृष्णमनुस्मरणात् ॥ यतश्च शस्त्रघाती दिनिमित्तं चतुर्दशी श्राद्धं पि
त्रादिनां मध्ये कोदिष्टमेव न भवति ॥ ननु पार्वणं तथा च गार्ग्यः ॥ चतुर्दश्यां
तु यत्काद्वंसपिंडीकरणात्परं ॥ एकोद्दिष्टविधानेन तत्कार्यं शस्त्रयोः ॥ स्त्र
तिः ॥ पित्रादिषु त्रिष्वपि शस्त्रहतेषु सर्वपापमेकोद्दिष्टान्येव कार्याणि पा
र्वणविधायकवचनाभावात् ॥ यत्तु पित्रादयस्त्रयो यस्य शस्त्रघातादि
र्निहताः ॥ स्वस्व तेषां पार्वणं कुर्यादाब्दिकानि पृथक् पृथगिति वचनं तत्साम्याणि
कर्ययेष्पदर्शनाद्नाकरं ॥ द्वैकोदिष्टं सदैकं कार्यं ॥ प्रेतपक्षे चतुर्द

स्यामेकोद्दिष्टविधानतो दैवयुक्तं तु तत्कादं पितॄणाम ह्ययं त्ववेदिति प्रयो
गपारिजातदाहृतवचनात्॥ यस्त्वेतस्यामेव चतुर्दश्यां मृतस्तस्य त्वया
हृन्निमित्ते श्राद्धं पार्वणविधिनैव कर्त्तव्यं॥ अमावास्याद्यायोयं स्यं प्रेतप
क्षेयवापुनः॥ पार्वणं तस्य कर्त्तव्यं नैकोद्दिष्टं कदाचनेति क्विचेष्वरपत
वचनात्॥ अमावास्यायां विशेषमाहालये अपराकें यमः॥ हंसे कर
स्थी तेयातु अमावास्या करात्रता॥ सांडेषाकं जरछाया इति बोधा
यनो ब्रवीदिति॥ इति माद्यपदः॥ ——— शुक्लाप्रतिपद्यशोक
व्रतं एतदुक्तं च विष्णोत्तरे आश्वयुक्शुक्लपक्षस्य प्रथमेऽह्नि दिनो ४८

दयोऽशोकं पूजयेद्वृक्षं प्ररूढं मुकुलद्रुमरू ——— सप्तधान्यैः प्ररु
ढकैः कर्मरैः कैः पुष्पैः फलैः कालोद्भवैर्हृद्यैः॥ नारिकेलैः सदाडिमैः पुष्प
धूपादीनां तत्रैव पूजयेत्तं तरुणं त्रमं॥ अशोकं पांडवश्रेष्ठ ——— कं
व्याप्नोति कुत्र वित्॥ अशोक शोक समनो न भवत्सर्व करं नः कुबेर
कुत्वा यतस्ततो रघोर्धर्मश्रवाः समन्वितः॥ वर्णकैर्वा समानिरूप पूजा
विधिर्वतुतं मंत्रेणानेन कौंतेय प्रणम्य स्वीधनव्रतामदावहा महात्मा
व्यमकरध्वजमंदिरा॥ प्रार्थये त्वामहाभाग सर्वकाम फलोत्थवे त्सने नत्मजये
त॥ दमयंती यथा सा लेवीव जानकी यथा शोकव्रता दस्माजपेते पति

वह्नाजेति आश्विनस्य कृष्णप्रतिपदि दिवाजीवपितृकेण दौहित्रेण मातामह
श्राद्धं कार्यं॥ तदुक्तं हेमाद्रौ॥ जातमात्रोपि दौहित्रो जीवत्यपि च मातुले॥ कु
र्यान्मातामहश्राद्धं प्रतिपद्याश्विने सितइति॥ इयं च संगवव्यापिनी ग्रा
ह्येति निर्णयदीपिके उक्तं॥ प्रतिपद्याश्विने शुक्ले दौहित्रेस्त्वेकपार्वणं
श्राद्धं मातामहं कुर्यात्सपिता संगवे सितइति गवेतेति विशेषणात् जी
वत्पितृकस्यैवाधिकारः॥ इदं च मुंडनं पिंडदानं चेत्यादिवचनेन जी
वत्पितृकं प्रतिषेधादत्र चैकविशेषवचनाभावात्पिंडरहितं
कार्यमिति केचित्॥ अन्ये तु न जीवत्पितृकं प्रति पिंडदानमात्रमनेन ५२

निषिध्यते॥ किं तु दर्शश्राद्धं गयाश्राद्धं॥ श्राद्धं च परपक्षिकं॥ न जीवत्पि
तृकः कुर्यात्तिलैः कृष्णैश्च तर्पणं॥ मिति वचनैकवाक्यतया श्राद्धमे
व निषिध्यते तद्वाक्यगतं दर्शादमुपलक्षणं॥ एवं च तस्य विशेषवचना
त्प्राप्तं श्राद्धं सपिंडमेव भवतीत्याहुः॥ अस्यामेव नवरात्रारंभः॥ तत्र
तत्स्वरूपं भविष्योत्तरे॥ एवं च विंध्यवासिन्या नवरात्रोपवासतः॥ एक
भक्तेन नक्तेन तथैवायाचितेन वा॥ पूजनीया जनैर्देवी स्थाने स्था
ने पुरे गृहे॥ राष्ट्रिपरैर्यामि ग्रामे ग्रामे वने वने॥ स्नातैः प्रमुदितैः हृ
ष्टैर्ब्राह्मणैः क्षत्रियैर्नृपैः॥ वैश्यैः शूद्रैर्भक्तियुक्तैर्म्लेच्छैरन्यैश्च मान

वैश्यःस्त्रीनीचश्चकुरुशार्दूलतद्विधानंमिदंशृणु एकैकवृद्धिर्देविपूजनेपि॥ कन्यासं

स्येनरवौस्तुकामाश्विनेप्रथ्यनंदिकं॥ अयाचीत्यथवैकाशीनक्ताशीवा

यवाशवः॥ कुमेशायंतिचामंत्र कुमारीर्भोजयेत्सुरा॥ वस्त्रालंकार

दानैश्चसंतोष्याःप्रतिवासरंबलिंचपरस्यंदद्यादेदनंमासमाषवत्॥

त्रिकाद्यंशजयेतदेवीजपस्तोत्रपरायणइति॥ अत्रदेवीपूजाप्रधानंउ

पवास —— — नागंपूजयित्वाश्विनेमासिविशोकोजायतेनरः

सादेपूजायाएवफलसंबंधादिति अत्रप्रतिपदःसउलकैचिताव

स्परविद्धाग्राह्येत्याहुः॥ तथाहिचोक्तंमार्कंडेयदेवीपुराणयोः॥ ५०

रवौविद्धातुयायुक्तानवेस्नातिपदाश्विनी॥ नवरात्रव्रतंतस्यांनकार्यंशु

भमिच्छता॥ देशभंगोभवेत्तत्रदुर्भिक्षंचोपजायते॥ नंदायांदर्शयुक्ता

यांयत्रस्यान्ममपूजनमिति तथा अमायुक्तानकर्त्तव्याप्रतिपत्पूजनं

मम॥ मुहूर्त्तमात्राकर्त्तव्याद्वितीयादिगुणान्विता॥ तथा॥ नदर्शकल

यायुक्ताप्रतिपच्चंडिकार्चने॥ उदयेद्विमुहूर्त्तापिग्राह्यासोदयगामि

नीति स्कंदाधिकातुसर्वैर्व्याख्याता॥ संपूर्णत्वाद्मायोमावाच्चेयराचा

माविद्धाप्रतिपत्परादिनेचेन्नास्तितदाविद्धापिग्राह्याएतद्विषमायेव

अमायुक्तानकर्त्तव्येतिसिंदूरप्रसादोदाहृतानिवचनानितिमाए

नामहत्त्वरत्वे स्कन्दमाधवहेमाद्यायुक्तं नक्तं व्रतत्वानुरोधेऽप्रतिपत्प्रदो
रवा षव्यापिनीग्राह्येति॥ नक्तव्रतत्वं च नक्तभोजनरूपत्वात्॥ तथाश्रीकल्प
द्रुमत्वाच्च॥ किंतु॥ पूजारूपस्य प्रधानस्य नक्तकालसाध्यत्वात्॥ त
थाहि॥ चरमंति नक्तानि शक्रयः पूजनं घृतइत्यादिसामान्यवच
नात्॥ आश्विने मासि मेघांते प्रतीपदादि तिथिर्भवेत्॥ तस्यां नक्तं प्र
कुर्वीत रात्रौ देवीं प्रपूजयेत्॥ त्रिव्रतमिदं देवि सर्वपापप्रणाशनं॥
रात्रिव्रतमिदं तस्य रात्रौ कर्तव्यतेष्यसरत्यादि देवीपुराणादिवचने॥
सध्याकगम्यते॥ एवं च पूजापस्य प्रधानस्य रात्रिकालेस्थिते॥ कर्मणो ५१

यस्य यः काल इति वचनात्प्रदोषव्यापिनी प्रतिपन्नवरात्रव्रते ग्राह्या
तत्र पूर्वेद्युर्दिन एव प्रदोषव्यापिनी पूर्वदिने ह्येतद्यामा सामस्तुतरादिने इ
येतद्व्याप्ता व पुनर्दैवसायाः करूप गौणकालव्याप्तिलाभात्॥ यत्तु॥
आद्याः षण्नाडिकास्त्याज्याः षोडश द्वादशापि वा॥ अपराह्णे च कर्तव्यं
शुद्धसंततिकांक्षिभिरिति वचनं॥ तदाद्याः षोडशनाडिस्तु लब्धाय यः
कुरुते नरः॥ कलशस्थापनं तत्र अरिष्टं जायते ध्रुवमिति॥ वचनो
त्तरेकवाक्यतया कुलाचारप्राप्तकलशस्थापनविषयं॥ एवं द्वितीया
विद्धाप्रतिपद्विधायकानि अमायुक्तिनिषेधकानि वचनानि कल्प

शस्थापनं विधेयमेव॥ अमायुक्ता सदा चैव प्रतिपन्निंदिता तथा॥ त
त्रैवस्थापयेत् कुंभं दुर्भिक्षं जायते ध्रुवं॥ प्रतिपत्सद्वितीया तु कुंभारोपण
कर्मणीति रुद्रयामलवचनात्॥ यदपि॥ प्रारंभं नवरात्रस्याहित्वा चित्रां
च वैधृतिमिति वचनं तदपि त्वाष्ट्रे वैधृतियुक्ता चेत्प्रतिपच्चंडिकार्चने
॥ तयोरंते विधातव्यं कलशारोपणं गृहे इति वचनात् कलशस्थापनवि
षयमेव॥ अत्र विशेषमाह दुर्गोत्सवे कात्यायनः॥ प्रतिपद्याश्विने मासि
भवे वैधृतिचित्रयोः॥ आद्यपादौ परित्यज्य प्रारंभेन्नवरात्रकं॥ अत्र विष्णु चि
त्रावैधृतिसंयुक्ता प्रतिपच्चेद्भवेन्नृप त्याज्यास्त्र्यंशास्तयस्त्वाद्यास्तुरीयां ५२

शे तु सृजनमिति॥ तथा न रात्रौ स्थापनं कार्यं न च कुंभाभिषेचनं विष्णुधर्मे
भास्करोदयमारभ्य यावत्तु दश नाडिकाः॥ प्रातःकाल इति प्रोक्तः॥ स्थाप
नं रोपणादि घिति॥ रुद्रयामले स्नानं मांगलिकं कृत्वा ततो देवीं प्रपूजये
त्॥ मृत्तानि मृत्तिकां निक्षिप्य पूर्वं कृत्वा तु वेदिकां॥ यवान्वै वापयेत्तत्र गो
धूमैश्चापि संयुतान्॥ तत्र संस्थापयेत् कुंभं विधिना मंत्रपूर्वकं॥ सौव
र्णं राजतं वापि ताम्रं मृन्मयजं तु वा॥ देवीपूजा तु जयंतीत्यनेन मंत्रेण का
र्या॥ जयंती मंगला काली भद्रकाली कपालिनी॥ दुर्गा क्षमा शिवा धात्री
स्वाहा स्वधा नमोस्तुते॥ अनेनैव तु मंत्रेण जपहोमादिकारयेदिति देवीपु

राणात्॥ दुर्गालिंगको वैदिकश्चागमिकोवा॥ तल्लिंगैः स्वजयेन्मंत्रैः सर्व
देवान्समाहितः अग्निपुराणात्॥ प्रणवादिचतुर्थ्यंतनमोंतं नमवानाञ्चा
सर्वसमापयेदितिसाधारणवाक्यात्॥ पूजाचषोडशोपचारैः पंचोपचारै
र्वा॥ अन्यैश्चराजोपचारैः छत्रचामरादिभिः॥ साच त्रिकालंप्रदोषेवी
शेषणं॥ पूजानंतरंचमार्कंडेयपुराणादिगतं देवीमाहात्म्यंपठेत् स्वशु
याद्यामाहात्म्यंभगवत्याश्च पुराणादिषु कीर्तितं॥ पठेच्चश्रृणुयाद्वा
पि सर्वकामसमृद्धये इति वचनात्॥ तथा एकोत्तरात्रिवृध्यातु नवमी
नावदेवहि॥ चंडीपाठं जपेच्चापि जापयेद्वाविधानतः इति॥ श्रवणंच ५२

ब्राह्मणादेवकर्त्तव्यं॥ वाचकं ब्राह्मणं विद्यान्नान्यवर्णजमादरादिति
भविष्यपुराणात्॥ पौराणस्तोत्रपाठश्च नारायणादीन्नमस्कृत्यकर्तव्यः॥
नारायणं नमस्कृत्य नरंचैव नरोत्तमं॥ देवीं सरस्वतीं व्यासं ततो जप
मुदीरयेदिति वचनात्॥ जपशब्दश्च भविष्ये॥ अष्टादशपुराणानि
रामस्यचरितं तथा॥ विष्णुधर्मादिशास्त्राणि शिवधर्मश्च भार विष्णु
त॥ भारतंपंचमोवेदो यन्महाभारतं स्मृतं॥ सौराश्च धर्माराजेंद्रमानवो
क्तामहीपते॥ जपेतिनामएतेषां प्रवदंतिमनीषिणः इति॥ पाठप्रकार
श्चमत्स्यसूक्ते॥ प्रणवंचादौचजप्त्वा स्तोत्रंवा संहितांपठेत्॥ अंते

चप्रणवं दद्यादितु कारितु पुरुषः॥ सर्वत्र पाठे विज्ञेयो ह्यन्यथा वि
फलं भवेत् शुद्धेनानन्यचित्तेन पठितव्यं प्रयत्नतः॥ नकार्यं सोक्तमन
साकार्यं स्तोत्रस्य वचनं॥ आधारे स्थापयित्वा तु पुस्तकं प्रजपेत् सुधीः॥
हस्ते संस्थापनाद्देवमस्मारस्यफलं भवेत्॥ स्वयं च लिखितं यत्तु कृति
ना लिखितं च यत्॥ अब्राह्मणेन लिखितं तच्चापि विफलं भवेत्॥ ऋषि
छंदादिकं न्यस्य पठेत् स्तोत्रं विचक्षणः॥ स्तोत्रे वदन्त्यपते यत्र प्रणव
न्यासमाचरेत्॥ संकल्पी स्तोत्रपाठे संरम्भात्कलापठेत् सुधीः॥ अ
ध्यायं प्राप्य विरमेन्न तु मध्ये कदाचन कृते विरामे मध्ये तु अध्याय यदि ५४

पठेत् सुधीः॥ अध्यायं प्राप्य चैकैकमागमियं वा जपेत् जापयेद्वा॥ दुर्गाश्रि
तो जपेत् स्तोत्रमेकचित्तः॥ समाहित इति देवीपुराणात्॥ कुमारी पूजनं च प्र
त्यहं यथाशक्ति एकयादिक्रमेण कार्यं॥ तत्प्रकारश्च देवीपुराणे ब्रह्मो
वाच॥ न तथा तुष्यते शक्र होमदानजपेन तु॥ कुमारीभोजनेनात्र यथा
देवी प्रसीदति॥ अत्र नवरात्रे॥ एकाब्द्याः सवर्सां कुमारीणां च वासव॥ पादै
सुकृते तत्तले रम्ये तत्र ता आसने स्थिताः॥ पूजयेद्गंधपुष्पैश्च वस्त्रादि
नाश्चापि मनोरमैः॥ पूजयित्वा विधानेन भोजनं तासु दापयेत्॥ खं
डखडु गुडं सर्पि दधि क्षीरं समाक्षिकं॥ तांसां देयं कुमारीणां शनैर्नु

ऊपयेन्नता॥पानीयं याचितं देव्यै मंत्रं वा याचितं श्रुतं॥ तां मस्तकस्य दास
वीस्तदा लाभमनं ददेवयत्॥ आवाम्य चाहतान् दत्वा लम्याहंत व्यमिलु
तदातु॥ शिरश्री दातव्याः कन्यकाभिरथाहताः॥ तेनापि प्रणिपात स्तक
न्मोनक्ति सर्वकः॥ अनेन विधिना राजन् देवी हि प्रं प्रसीदति॥ इत्यातिवि
विधान्कामान्मनोनीत्यान्सुराधिपा॥ राज्यं कृत्वा ततः पश्चाद्देवीलोकं च
गच्छतीति स्कांदे॥ एकैकां पूजयेत् कन्यामेकवृध्यानथैकच॥ द्विगुणं
त्रिगुणं वापि प्रत्येकं पूजनं वरं॥ नवभिर्लभते भूमिमैश्वर्यं द्विगुणेनतु॥
एकवर्षा लभेत् हेम मेकैकेन श्रियं लभेत्॥ ऐकवर्षातु याकन्या प्र ५५

ऊार्थं तां विवर्जयेत्॥ गंधपुष्पफलादीनां प्रीतिस्तस्या न विद्यते॥ द्विवर्ष
कन्यामरभ्य दशवर्षावधिक्रमात्॥ तासां च क्रमेण कुमारिकाः॥ त्रिमूर्तिः
कल्याणी॥ रोहिणी॥ कालिका चंडिका शांभवी दुर्गा सुभद्रेति नामानुक्तानि
स्कांदे॥ कुमारिका द्विवर्षा तु त्रिवर्षा तु त्रिमूर्तिनी॥ चतुर्वर्षा तु कल्याणी
पंचवर्षा तु रोहिणी॥ षट् र्गा तु भवेत्कालि सप्तवर्षा तु चंडिका॥ अष्टवर्षा
शांभवी तु दुर्गा तु नववर्षिः स्मृता॥ दशवर्षा सुभद्रेति नामभिः परिकीर्त्ति
ताः॥ अत ऊर्ध्वं तु या कन्याः सर्वकार्येषु वर्जिताः॥ आसां क्रमेण फला
न्याह स एव॥ दुःख दारिद्र नाशाय शत्रूणां नाशनाय च॥ आसु प्रव

लक्ष्म्यर्थं कुमारीः पूजयेन्नरः॥ आयुष्कामस्त्रिमूर्तिं तु त्रिवर्गस्य फलाप्त
ये॥ अपमृत्युव्याधिपीडादुःखनामपनुत्तये॥ सौख्यधान्यधनारोग्यपु
त्रपौत्रादिवृद्धये॥ कल्याणीं पूजयेद्धीमान्नित्यं कल्याणवृद्धये॥ आरोग्य
सुखकामी तु धन्यकामस्तथैव च॥ यशस्कामी नरो नित्यं रोहिणीं परि
पूजयेत्॥ विद्यार्थी जयार्थी च राज्यार्थी च विशेषतः॥ शत्रूणां च विधा
नाशार्थं कालिकां पूजयेन्नरः॥ संग्रामे जयकामी च चंडीकां परिपू
जयेत्॥ दुःखदारिद्र्यनाशाय नृपसंमोहनाय च॥ महापापविनाशा
य शांभविं च प्रपूजयेत्॥ सकलोत्कृष्टशत्रूणामुग्रसाधनकर्मणि॥ ५९

दुर्गां तु मीतिनाशाय पूजयेत् यत्नतो बुधः॥ सौभाग्यधनधान्यादिवां
छितार्थफलाप्तये॥ सुभद्रां पूजयेन्मर्त्यो राशि राशि विवृद्धये॥ प्रत्याप
कारश्चतन्त्रे॥ प्रातःकाले विशेषेण कृतस्नानो विशेषतः॥ आवाह
येत्ततः कन्यां मंत्रेणानेन भावयन्॥ मंत्राक्षरमयीं लक्ष्मीं मातृणां रूप
धारिणीं॥ नवदुर्गात्मिकां साक्षात् कन्यामावाहयाम्यहं॥ आवाहनमंत्रः॥
ततः संपूजयेद्धीमान् मंत्रैरेभिः पृथक् पृथक्॥ गंजे त्रयेपेस बंधे सर्व
शक्तिस्वरूपिणी॥ पूजां गृहाण कौमारि जगन्मातर्नमोऽस्तु ते॥ कुमा
र्यै॥ त्रिपुरां त्रिपुरां धारां त्रिवर्गज्ञानरूपिणीं॥ त्रैलोक्यवंदितां देवीं

त्रिमूर्त्तिं पूजयाम्यहं॥ त्रिमूर्त्तैः॥ कालिकां कालातीतां कारुण्यहृदयां
शिवां॥ कल्याणजननीं नित्यं कल्याणीं पूजयाम्यहं॥ कल्याण्याः॥ अणि
मादिगुणाधारामकाराद्यक्षरात्मिकां॥ अनंतशक्तिकां लक्ष्मीं रो
हिणीं पूजयाम्यहं॥ रोहिण्यैः॥ कामचारीं शुभां कांतां कालचक्रस्वरू
पिणीं कामदां करुणोदारां कालिकां संपूजयाम्यहं॥ काल्याः॥ चंडवीरां चं
डमायां चंडमुंडप्रभंजिनीं पूजयामि सदा देवीं चंडिकां चंडविक्रमां॥
चंडिकायाः॥ सदानंदकरीं शांतां सर्वदेवनमस्कृतां॥ सर्वभूतात्मिकां
लक्ष्मीं शांभवीं पूजयाम्यहं॥ शांभव्याः॥ दुर्गमे दुस्तरे कार्ये भवदुःख ५

विनाशिनीं॥ पूजयामि सदा भक्त्या दुर्गां दुर्गतिनाशनीं॥ दुर्गायाः॥ सुंदरीं
स्वर्णवर्णाभां सुखसौभाग्यदायिनीं॥ सुभद्रजननीं देवीं सुभद्रां पूजया
म्यहं॥ सुभद्रायाः॥ एवमभ्यर्च्चनं कुर्यात् कुमारीणां प्रयत्नतः॥ कंचुके
श्चैव वस्त्राद्यैर्गंधपुष्पाक्षतादिभिः॥ नानाविधैर्भक्ष्यभोज्यैर्भोजयेत्पा
यसादिभिः॥ हीनाधिकांगीं कुष्ठादिविकारां ककुलां तथा॥ ग्रंथीस्फु
टितसर्वांगीं रक्तपूयव्रणांकितां॥ जात्यांधां केकरीं काणां कुरूपां तनु
रोमशां॥ संत्यजेद्रोगिणीं कन्यां दासीगर्भसमुद्भवां॥ एतास्त्याज्याः॥
आरोगिणीं सुपुष्टांगीं सुरूपां व्रणवर्जितां॥ एकवंशासमुद्भुतां कन्यां स

मकन्यां पूजयेत्॥ ब्राह्मणी सर्वकार्येषु उग्रार्थे नृपवंशजा॥ लाभार्थे वैश्य
वंशोत्थां सुतार्थे शूद्रवंशजां॥ दारुणे चांत्यजातीनां पूजयेद्विधिना न
रः इति॥ क्वचित्तु सर्वासामेक एव मंत्र उक्तः॥ मंत्राक्षरमयीं लक्ष्मीं मातृ
णां रूपधारिणीः॥ नवदुर्गात्मिकां साक्षात्कन्यामावाहयाम्यहमिति॥ अ
त्र वेदपारायणमुक्तं रुद्रयामले॥ एवं चतुर्वेदविदो विप्रान् सर्वान् प्रसा
दयेत्॥ तेषां च वरणं कार्यं वेदपारायणाय वै इति। तथा देवीपुराणे॥
यद्याद्यदिवसे कुर्याच्चंडिकापूजनादिकं॥ द्विगुणं तु तृतीये च त्रिगुणं
तत्परेऽहनि॥ नवमीतिथिपर्यंतं शक्त्या पूजाजपादिकमिति॥ अशक्तो पू ५८

जादिकमन्येन कारणीयं॥ स्वयं वाप्यन्यतो वापि पूजयेत् पूजयीत वेदिदे
विपुराणात्॥ रजःसूतकास्ताशावपि च कार्यं॥ नष्टे शुक्रे तथा जीवे सिंह
स्थे च बृहस्पतौ॥ कार्या चैव सदैवार्चा प्रत्यहं कुलधर्मत इति धर्मप्रदीपात्॥
अत्र सास्वस्पश्यस्य पूजनमुक्तं मदनरत्नोदाहृते देवीपुराणे॥ अस्वस्थसुक
स्तुः क्रमप्रतिपत्स्याति शुक्रे सुशोभने॥ सर्वमुच्चै भवानामग्रयमंस्त्यर्थमा
वहेत्॥ तस्मात्कामैर्नरैस्तत्र पूज्यो सौम्या अद्यान्वितैः॥ पूजनीया स्वतु
रगा नवमी यावदेव हि॥ शांतिस्वस्त्ययनं कार्यं॥ तदा तेषां दिने दिने धा
न्यं नद्यानकं कुष्टं वचा सिद्धार्थकांस्तथा॥ पंचरंगेण सूत्रेण कंठे तेषां तु बं

धयेत्॥ कायवमैर्वारुणैः सौरैः शाक्रैर्मंत्रैः सवैष्णवैः॥ वैश्वदेवैस्तथाग्नेयैर्हो
मः कार्यो दिने दिने॥ तुरंगारत्नाणीयास्तु पुरुषैः शस्त्रपाणिभिः। दारिद्र्यतः — चा
कचित्तत्रनन्यथा द्या कथंचनेति॥ तथा ज्येष्ठायोगे पुरा तत्र गजाश्वो
कुमुदेन महाकुलाः॥ पृथिविमवल्लूर्वंस शैलवनकाननं कुमुदे रावणः॥ पद्मः पु
ष्पदंतोप्यवामनः॥ सुप्रतिकोंजनोनीलस्तस्मात्तांस्तत्र पूजयेत्॥ शाका
दृष्टात्समारभ्य नवम्यंतं च पूर्ववद्विदिति॥ प्रतिपदादि पूजाप्रकारविशेषो
भविष्ये॥ केशसंस्कारद्रव्याणि प्रदद्यात्प्रतिपद्दिने। पट्टदोरं द्वितीया
यां केशसंयमहेतवे॥ दर्पणं च तृतीयायां सिंदूरालक्तकं तथा॥ मधुप ५९

र्कं च तुर्थ्यां तु तिलकं तत्र मंडनं॥ पंचम्यां मंगरागं च षष्ठ्यां त्वालंकरणानि च
सप्तम्यां बिल्वतरौ बोधं सायंसंध्या सु कारयेत्॥ सप्तम्यां प्रातरानीय गृह
मध्ये प्रवेशयेत्॥ उपोषणमथाष्टम्यां अष्टम्यां त्वथ पूजनं॥ नवम्यां तु
प्रचंडायाः पूजां कुर्याद्बलिं तथा॥ संहृत्य प्रेषणं कुर्याद्दशम्यां शाबरो
त्सवैः॥ अनेन विधिना यस्तु देवीं प्रीणयते नरः॥ स्कंदं रक्तवत्पालयेत्तं
तु देवी सर्वापद्भ्यः स्थितमिति॥ अत्र स्त्रीणां विशेषः॥ मनुः॥ पुष्पालंका
रवस्त्राणि गंधधूपानुलेपनं॥ उपवासेन तुष्यंति दंतधावनमंजनं॥ दे
मार्त्रोगारूढे॥ गंधालंकारतांबूलपुष्पमाल्यानुलेपनं॥ उरार्द्धस्वर्वव

न शौ

६० त्॥ मात्स्ये॥ अंगारातुरजो येऽये ग्रहजा मन्येन कारयेत्॥ एवमाशौचेऽपि॥ सूत पि

कालाकमारभ्य मनेकाहंतु यकृतं॥ कायिकं तत्तु कुर्यीत न तु दानार्चनं ज

पं॥ सूतकाहे तु यत्किंचिद्दानाद्यं तद्रीतं न भवेत्॥ सूतकानंतरे लंघितं क

र्तव्यमतं द्वितेदिति वचनात्॥ आश्वीनशुक्लपंचम्यामुपांगललिताव्र

तं॥ तत्र पंचमी पूर्वविद्धा ग्राह्या॥ युग भूतानामिति युग्मवाक्यात्॥ अ

स्य च मुल्का जागरण रूपत्वेन॥ मुल्का जागरणे नक्तं चेत्प्रदोषव्याप्ते तथा॥

तारा व्रतेषु सर्वेषु रात्रियोगो विशिष्यत इति हेमाद्रिधृत वचनाच्च॥ अ

स्मिन् पक्षे मूलेन ह्वानमेत् सरस्वतीस्थापनमुक्तं देवीपुराणे॥ मूलेषु स्था ६०

पनं देव्याः पूर्वाषाढासु पूजनं॥ उत्तरासु बलिं दद्यात् श्रवणेन विसर्जयि

ति रुद्रयामले॥ मूलर्क्षे सुराधीश पूजनीया सरस्वती॥ पूजयेत्तत्स्वरं

देव यावद्वैष्णवमृक्षकं॥ नाध्यापयेन्न च लिखेन्नाधीयत कदाचन॥

आ पुस्तके स्थापिते देवि विद्याकामो द्विजोत्तम इति॥ षष्ठ्यादि पंचोत्सवो

नवमरात्रे देवीपूजायां कालिकापुराणे॥ बोधयेद्बिल्वशाखायां षष्ठ्यां

देवीं फलेषु च॥ सप्तम्यां बिल्वशाखां तामाहृत्य प्रतिपूजयेत्॥ पुनः

पूजां तथाष्टम्यां विशेषेण समाचरेत्॥ जागरं च स्वयं कुर्याद्बलिदा

नं महानिशि॥ प्रभूत बलिदानं च नवम्यां विधिवच्चरेत्॥ ध्यायेद्दश

६१

दृष्ट्वा मुक्तां देवीं दुर्गां मंत्रेण पूजयेत्॥ विसर्जनं दशम्यां तु कुर्याद्वै शावरोत्स
वैः॥ धूलिकर्दमनिक्षेपैः क्रीडाकौतुकमंगलैः॥ भगलिंगाभिधानैश्च
भगस्रकीगीतकैरीति॥ देवीपुराणे॥ ज्येष्ठानक्षत्रयुक्तायां षष्ठ्यां बि दी
ल्वाभिमंत्रणं॥ सप्तम्यां मूलयुक्तायां पत्रिकायाः प्रवेशनं॥ पूर्वाषाढायुक्ता
ष्टम्यां पूजाहोमाद्युपोषणं॥ उत्तरेण नवम्यां तु बलिभिः पूजयेच्छिवां॥
श्रवणेन दशम्यां तु प्रणिपत्य विसर्जयेदिति॥ अत्र तत्तत्तिथीनां तत्तन्न
क्षत्रयोगः संनिवेषफलातिशयार्थः॥ न तु स एवादरणीयः तदुक्तं लिं
गे॥ मूलक्षान्वेपि सप्तम्यां केवलायां प्रवेशयेत्॥ तथा तिथ्यंतरेष्वेव ५८

नक्षत्रेषु तेषु फलोच्चयः॥ देवलः॥ तिथिनक्षत्रयोर्योगे द्वयोरेवानुपालनं॥
योगाभावे तिथिर्ग्राह्या देव्याः पूजनकर्मणीति॥ सप्तम्यादिषु योगोत्र विशे
व्रतीश्च पूजयेद्देवीं सप्तम्यादिदिनत्रयमिति॥ भविष्योत्तरेपि॥ त्रिरात्रं
वापि कर्तव्यं सप्तम्यादि यथाक्रममिति॥ अष्टमीनवम्योरेव वा पूज
नं कर्तव्यं॥ अष्टम्यां च नवम्यां च जन्ममोक्षप्रदां शिवां पूजयित्वाश्वि
ने मासि विशोको जायते नर इति वचनात्॥ केवलाष्टमीपूजोक्ता भवि
ष्ये॥ तत्राष्टम्यां भद्रकाली दक्षयज्ञविनाशिनी॥ प्रादुर्भूता महाघो
रा योगिनीकोटिभिः सह॥ अतोर्थं पूजनीया सा तस्मिन्नहनि मानन

६२ ग

वैः॥ उपोषितैर्धूपदीपवस्त्रैर्मौल्यानुलेपनैरिति॥ अयं च केवलाष्टम्यु
पवासः पुत्रवतो निषिद्धः॥ उपवासं महाष्टम्यां पुत्रवान्न समाचरेत्॥
यथा तथैव पूतात्मा व्रती देवीं विसर्जयेदिति कालिकापुराणात्॥ के
वलनवमीपूजा न विषये॥ लब्ध्वानि पेकावरदास्तु ह्ये चाम्ब सुजस्य च
तस्मात्सा तत्र संपूज्या नवम्यां चंडिका बुधैरिति॥ उपवासोप्यस्यां मु
कः॥ तस्मादियं महापुण्या नवमी पापनाशिनी॥ उपोष्या तु प्रयत्ने
न सततं सर्वपार्थिवैरिति पत्रिका प्रवेशस्त्वाश्विनकृष्णनवम्यां
बोधनं सामर्थ्ये नवरात्रांतर्गतषष्ठ्यां तत्कर्तव्यं॥ षष्ठ्यां बिल्वत ६२

रौ बोधं सायंसंध्यासु कारयेत्॥ इति भविष्यवचनात्॥ अत एव षष्ठी सायं
संध्याव्यापिनी ग्राह्या॥ आमंत्रणं तु पत्रीप्रवेशाव्यवहितपूर्वदिनेका
र्यं॥ तदुक्तं ब्रह्मांडे पत्रीप्रवेशात्पूर्वेद्युः सायाह्ने बिल्ववासिनीं॥ चं
डिकामंत्रयेद्विद्वान्नावष्टीपुरस्क्रीयेति॥ मत्स्यसूक्ते॥ ज्येष्ठावाप्य
थवा षष्ठीसायंकाले न चेद्भवेत्॥ सायमेव तथापि स्याद्बिल्वशाखा
भिमंत्रणं॥ सर्वाभिष्टं संनद्धात्रां सायंप्रातः मपि त्यजेत्॥ यदा तु पत्रि
काप्रवेशनपरेद्युर्न विष्यति॥ संनिकृष्टं तु यत्पूर्वं पत्रिकादिवसस्य
तु॥ तद्दिने वरणं कुर्यात्कृत्वा परेशाखां प्रवेशयेदिति॥ पत्रिका प्र

जाय्यांसप्तम्यादितिश्रुतिसंमताः कालेनमुहूर्तोत्तरतिथिविद्धमेवग्राह्यं
नागवत्साः प्रवेशादिविसर्गांताश्चयाः क्रियाः॥ तिथिउदयगामि
न्यासर्वास्ताः कारयेद्बुधइति नंदिकेश्वरपुराणात्॥ अष्टमीतुपत्री
घ्नजातिरिक्तापिदिनीकुजनेनवमीविद्धैवग्राह्या॥ वसुरंध्रयोरितियु
ग्मवाक्यात्॥ शारन्महाष्टमीपूज्यानवमीसंयुतासदा॥ सप्तमीसंयु
तानित्यंशोकसंतापकारिणी॥ सप्तमीशल्यसंयुक्तांमोहादज्ञानतो
पिवा॥ महाष्टमींप्रकुर्वाणोनरकंप्रतिपद्यतइतिमदनरत्नधृत
स्मृतिसंग्रहाच्च॥ स्मृतिसमुच्चये॥ सप्तमीशल्यसंविद्धावर्जनीया ६३

सदाष्टमीस्तोकापिसतिथिः पुण्यायस्यांसूर्योदयोभवेत्॥ दुर्गोत्सवे॥ मूले
नापिहिसंयुक्तासदात्याज्याष्टमीबुधैः॥ लेशमात्रेणसप्तम्या अपिस्या
द्यदिदूषिता॥ अतएवगौरीतृतीयावदेवअल्पसप्तमीयोगेनत्याज्य
त्वं॥ अल्पायाअप्युत्तरस्याअष्टम्याग्राह्यत्वंस्पष्टं॥ यदातुपरदिने
नवमीसूर्योदयंनस्पृशतितदाष्टमीसप्तमीविद्धैवग्राह्या॥ यदासूर्योद
येनस्पानवमीचापरेहनि॥ तदाष्टमींप्रकुर्वीतसप्तम्यासहितांनृपेति
स्मृतिसंग्रहात्॥ तथाचाअहंमहावजननावरावयोरंतरं क्वचित्॥ त
स्माद्देसप्तमीविद्धाकार्यादुर्गाष्टमीतिथिरित्यादीनिवचनानियएत

द्विपाद्याप्येवं॥ इयंच नौमेतिप्रशस्ता॥ अष्टम्यां तु दिने सूर्ये दिनांते न नवमीन
वेत॥ कुजवारो न वेत्तत्र पूजनीयाः प्रयत्नत इति मदनरत्नधृत वचनात्॥
अत्र विशेषेण पूजाकार्या॥ एनः पूजांतथाष्टम्यां विशेषेण समाचरेत्॥ जा
गरं च स्वयं कुर्याद्बलिदानं महानिशीति कालिकापुराणात्॥ तथा॥ पशु
घातः प्रकर्तव्यो गवलाजवधस्तथा॥ तथा॥ देवीं तु पूजयित्वा तु अर्द्ध
रात्रेष्टमीषु वै॥ घातयंती पशून्भक्त्या ते भवंति महाबलाः॥ बलिंच ये
प्रयच्छंति सर्वभूतविनाशनां तेषां तु तुष्यते देवी यावत्कल्पं तु शांक
रीते॥ एवं च बलिदानं अष्टमी नवमीय पशुहिंसान्यायेन धर्ममपि द्वा ६४

त्रियादिपरमेव॥ ब्राह्मणस्य तु सात्विकी जययाद्येनैवेद्यैश्च निरामि
षैरितियमेव पूजा भवति॥ तस्मात्सात्विककर्मस्वेवाधिकारस्य भगवद्गी
तादिषु प्रसिद्धत्वात्॥ सप्तमेतदुक्तं देवीपुराणे॥ तदुर्द्धयामिनीशेषवि
जयार्थं नृपोत्तमैः॥ पंचाब्दं लक्षणोपेतं गंधधूपसमन्वितं॥ विधिवत्का
लिकालिति जस्त्वा खड्गेण घातयेत्॥ एवं सुरां वा स्वगात्ररुधिरेण च पूजा
ब्राह्मणस्य न भवति॥ स्वगात्ररुधिरं दत्वा ब्रह्महत्यामवाप्नुयात्॥ म
द्यं दत्वा ब्राह्मणस्तु ब्राह्मण्यादेव हीयते इति कालिकापुराणात्॥ माव
न्नकादिना तु बलिदाने ब्राह्मणस्य भवति॥ माषकुल्माषमांसाद्यै दे

योरिद्वुर्बलिर्निशि॥ कुष्मांडमिक्षुदंडश्च मद्यमासवपक्व॥ प्रतेबलिरा
समं ज्ञेयोस्तृप्तौ छागसमस्मता इति कालिकापुराणात्॥ रुद्रयामले॥ छा
गात्रावेतुकूष्मांडं श्रीफलं च वामनोहरं॥ वस्त्रसंवेष्टितं कृत्वा छेदयेत्तु
रिकादिनेति होमस्तु॥ पूर्वाषाढायुताष्टम्यां पूजा होमाद्युपोषणं मित्व
ष्टम्यां॥ नवम्यां बलिदानं च कर्तव्यं वै यथाविधिः॥ जपं होमं च विधि
वत्कुर्यात्तत्र विभूतये इति नवम्यां च विधानात्॥ शिष्टसमाचाराच्च॥
अष्टम्यामारभ्य नवम्यां समापनीयो नवम्यामेव कार्यः॥ होमद्रव्यं चा
ज्यतिलादि॥ दुर्गायै तिलहोमैश्च दधिक्षीरघृतादिभिरिति देवीपुराण

त्॥ मंत्रश्च॥ जयंती त्यादि॥ अनेनैव तु मंत्रेण जपो होमादिकारयेदिति
देवीपुराणात्॥ केचित्तु मार्कंडेयपुराणगत सप्तशतिवेन प्रतिश्लोकं स्वा
हाकारांतेन तिलसर्पिर्मिश्रीतपायसेन होमं कुर्वंति॥ प्रतिश्लोकं च जु
हुयात्पायसं तिलसर्पिषा इति रहस्याख्याग्रंथवचनं॥ तत्र प्रयाण
मुपलस्यंति॥ रुद्रयामले॥ पि॥ प्रधानं द्रव्यमुद्दिष्टं पायसान्नं तिला
स्तथा॥ किंशुकैः सर्षपैः प्रोक्तलाजा वर्षं किरैस्तथा॥ यद्वैवश्रीफलैर्दि
व्यैर्नानाविधैः फलैस्तथा॥ रक्तचंदनखंडैश्च गुग्गुलेश्च मनोहरैः॥
प्रतिश्लोकं च जुहुयात्सर्वद्रव्याणि क्रमात्॥ इति महाष्टमी॥ अ

यनवमी॥ साचाष्टमीविद्धाग्राह्या युग्मवाक्यात्॥ श्रावणीदुर्गनवमीतः॥ दू
र्वाष्टमीचयाः॥ सर्वाकिदेवकर्तव्याश्वि। वरात्री बलेर्दिनमिति वृद्धयमवच
नात्॥ तथा॥ अश्वयुक्शुक्लपक्षेया अष्टमी मूलेन संयुता। सा महानवमी
प्रोक्तेति॥ अस्यां पूजाहोमादिकं कृत्वा अन्यत्र बलिदानं कार्यं॥ अन्यत्र ब
लिदानंच नवम्यां विधिवत्कारयेदिति कालिकापुराणात्॥ यदा तु नव
मी अष्टमीविद्धा मूला द्वितीयदिनेऽपि किंचिद्भवति तदा नवमीप्रयुक्तस्य
पूजादेः पूर्वदिने नुष्ठानेऽपि महाबलिदानमात्रं द्वितीयदिने कर्तव्यं॥
अष्टम्या मुदिते सूर्ये दिनांते नवमी भवेत्॥ अज्ञाते बलिदाने तु की ६९

यमानापि लभ्यते॥ नवम्यां तत्र संपूज्या दुर्गा दुर्गार्तिनाशिनीति व
चनात्॥ अत्र पूजा बलिदानरूपैव॥ सूर्योदये परं रिक्ता मरणं स्याद्द
परायदि॥ बलिदानं प्रकर्तव्यं तत्र देव्याः शुभावहं॥ बलिदाने कृतेऽष्ट
म्यां राष्ट्रभंगो भवेन्नृपेति देवीपुराणात्॥ एवं च बलिदानंच नवमी
प्रयुक्तं॥ अष्टमी प्रयुक्तस्य तत्रैव कर्तव्यत्वात्॥ द्वितीयदिने न
वम्या अभावे तु पूर्वेद्युरेव नवमीमध्ये कार्यं॥ दशम्यां बलिदा
नं तु क्रियते यत्र मानवैः॥ तद्राष्ट्रं नाशमायाति नरको यत्र वै स्फुटमि
ति॥ भविष्ये॥ नवमीप्रयुक्तस्य बलिदानं दशम्यां करदोषाश्रवणा

६७ नं तत्॥ एवं नवम्यां होमकुमारीपूजनब्राह्मणभोजनादि कृत्वा दक्षिणामा
चार्याय दद्यात्॥ नवम्यां सर्वव्रतस्य कर्तव्या भूतिमिच्छता॥ दक्षिणावस्त्र
युग्मं चाचार्याय निवेदयेदिति मत्स्यसूक्तात्॥ विसर्जनं तु दशम्या
मेव कार्यं॥ संपूज्य प्रेषणं कुर्याद्दशम्यां शाबरोत्सवैरिति विष्णुपुरा
णात्॥ ततः संप्रेषिता देवी दशम्यां शाबरोत्सवैरिति कालिकापुराणोक्तेश्च॥
पारणा स्यादपि नियमत्यागकृत्यस्य विसर्जनोत्तरकालत्वात्तदपि विस
र्जनोत्तरं दशम्यामेव कर्तव्यं॥ अत एव हेमाद्रौ धौम्यवचनेन नवमी
पर्यंतं व्रतमुक्तं॥ आश्विने शुक्लपक्षे तु कर्तव्यं नवरात्रकं॥ प्रतिप ६७

दादिक्रमेणैव यावच्च नवमी भवेदिति॥ नवमितिथिपर्यंतं वृद्ध्या पू
जाजपादिकमिति च॥ एवं च विध्यवासित्वान्नवरात्रोपवास इति
नविध्योत्तरे॥ यत्तु॥ आश्विने शुक्लपक्षे तु नवरात्रमुपोषितः॥ नव
म्यां पारणं कुर्याद्दशमीमिश्रिता न चेदिति ब्राह्मणनाम्ना केनचिल्लि
खितं तदनाकरं॥ साकरं चेद्ज्योहामिसात्त्विकविषयं तस्याष्टमीपर्यंत
लोके:॥ अत्र सूतकादौ परत्वार्थमुक्तं रुद्रयामलेपि सूतके पार
णं कुर्यान्नवम्यां होमपूर्वकं॥ तदंते भोजयेद्विप्रान्दानं दद्याच्च शक्ति
त इति॥ अंगिरास्तु॥ नकारयेमित्याद्य॥ नियमस्यापरानावीजप

ष्पदं तररजः॥ उक्तोध्येव तु तारात्रीः स्मात्वाशेष्वं चरेद्व्रत मिति॥ अन्यत्रा
पि नियमस्यात्रतं — स्याच्चरं जः पत्रेय त्कथं च न॥ त्रिरात्रिं तु चपेद्र्ध्व म
तशेषं समाचरेयेदिति॥ अत्राशौचग्रहणं रजोग्रहणं चोपलक्षणं॥ ए
वाचारतो व्यवस्थ्य प्रतिमापूजाविधिः पत्रिकापूजाविधिश्चान्यत्र मत
कृतोऽदृष्टव्यः॥ विस्तरभयान्न लिखितोऽयमेव विजयदशमी॥ इयं
च यदि उत्तरैः श्रवणयुक्तातदैव तत्तरा॥ तिकेचित॥ सर्वेषामेव ति
र्मलत्वादेकादशी व्रतवदत्रापि सूतकमध्ये पारणं कर्त्तव्यमित्य ६८
न्ये मन्यु प्रतिजाति अत्र नवरात्रेतोमस्य पूजारूपत्वेन प्रधानत्वा

ततस्य च नित्यसाध्यत्वे नाशौचे असंभवात् वतु दानार्चनं जपमिति
निषेधात् तत्समाप्तिर्विना नियमस्य पोयवा स समाप्य संज्ञ वा दाशौचां
ते होमादि पूर्वकं पारणं कर्त्तव्यं॥ प्रातिनाशिष्टारोष्येवमेव॥ उदये दश
मी किंचित्संपूर्णैकादशीयदि॥ श्रवणर्क्षं यदा कार्या सा तिथि विजया वि
धा॥ श्रवणर्क्षे तु पूर्णायां काकुत्स्थः प्रस्थितो यतः॥ उल्लंघयेयुः सी
मानं तद्दिनेर्क्षे ततो नरा इति कश्यपवचनात्॥ संपूर्णैकादशीयदि॥ श्रव
णर्क्षं यदा कार्या सा तिथि विजया विधा॥ श्रवण' ति वचनात्तदा कर्मका
लव्याप्तिरपि नापेक्षिता॥ अन्यथा सर्वपक्षेषु पूर्वा॥ दशम्यां तु जनैः

संपूजनीयापराजिता॥ ऐशानीं दिशमाश्रित्य अपराह्णे प्रयत्नतः
तस्यापराह्णस्य कर्मकालत्वविधानात्॥ अस्यां राज्ञा॥ अथातोऽस्या
लंघ्यारभ्यास्यामद्भ्यादिना गोपथब्राह्मणोक्तं॥ प्रस्थानिकविधिं कृ
त्वा तदुक्तप्रकारेणापराजितपूज्यं कुर्यात्॥ तत्प्रकारश्च मदनरत्नादौ द्र
ष्टव्यः॥ सर्वे च जनास्तस्मादपराह्णे ऐशानीं दिशमाश्रित्य सीमामुल्लं
घ्य अपराजितां पूजयेयुः स चैवं॥ अद्याश्विनशुक्लदशम्यां देशमासि
ध्यर्थं अपराजितापूजां करिष्ये। इति संकल्प्याचंदनाक्लिखित्वाष्टदल
मध्ये अपराजितायै नम इत्यपराजितां॥ तद्दक्षिणतः॥ क्रियाशक्त्यै न

म इति जयां तद्वामतः॥ उमायै नम इति विजयां॥ प्रतिष्ठाप्य॥ ॐ अपराजि
तायै नमः॥ ॐ जयायै नमः॥ ॐ विजयायै नमः॥ इत्यावाहनाद्युपचारैः सं
पूज्य प्रणम्य॥ इमां पूजां मया देवि यथाशक्त्या निवेदितां॥ रक्षार्थं तु स
मादाय व्रज स्वस्थानमुत्तममिति विसर्जयेयुः॥ आचारात् शमीं पूजयि
त्वा॥ अमंगलानां शमनीं शमनीं दुष्कृतस्य च॥ दुःस्वप्ननाशनीं धन्यां
प्रपद्येहं शमीं शुभामिति तां प्रार्थयेयुः॥ क्वचिदन्येपि मंत्राः॥ शमी श
मयते पापं शमी लोहितकंटका॥ धारिण्यर्जुनबाणानां रामस्य प्रिय श्री
वादिनी॥ करिष्यमाणयात्राया यथाकालं सुखं मया॥ तत्र निर्विघ्नक

५०

श्रीत्वं भवश्री रामपूजिते इति॥ तथा॥ गृह्णात्वु सा हृता मार्गशीर्षमी मू
लगतां मृदं॥ गीतवादित्रघोषेण स्नानं नयेत् स्वगृहं प्रति॥ ततो भूषण
वस्त्रादि धारयेत् स्वजनैः सहेति॥ ज्योतिषे कृत्वा नीराजनं राजा ब
लवृद्धये यथाक्रमं॥ शोभनं खंजनं पश्येज्जलगोष्ठसंनिधाविति इति
विजयादशमी॥ आश्विने शुक्लैकादश्यां कार्तिकस्नानारंभः
पाद्मे कार्तिकमाहात्म्ये॥ आजानुपादिकमिति च॥ एवं विंध्यवासिन्या
नवरात्रोयावासत इति भविष्योत्तरे॥ यत्तु॥ आश्विने शुक्लपक्षे तु
नवरात्रमुपोषितः॥ नवम्यां पारणं कुर्याद्दशम्यामिश्रितान्न चेदिति ५०

तिथ्या लग्नस्नानं चित्रलिखितं वदनाकरं॥ साकं स्वेच्छो हामिसारिका कि
चियं तस्याष्टमीपर्यंत लोके॥ अत्र सूतकादौ पारणाकार्य सूक्ष्मरुद्रय
मलेपि॥ सूतके पारणं कुर्यान्नवम्यां होमपूर्वकं॥ तदंते भोजयेद्विप्रान्रा
नदद्याच्छक्तित इति॥ अंगिरास्तु॥ नकार्यमित्याह॥ नियमस्यायदा
नारी प्रपश्येदंतरा रजः॥ उपोष्ये वस्तुतारात्राः स्वालासेषांचरेद्व्रतमिति।
अन्यत्रापि॥ नियमस्यात्र तस्याश्च रजः प्रदेपत्कथंचन॥ त्रिरात्रं तु द
पेदर्थं व्रतशेषं समाचरेदिति॥ अत्राशौचग्रहणं रजोग्रहणं चोपल
क्षणं॥ एवं चाचारतोऽव्यवस्थ प्रतिमापूजाविधिः॥ पत्रिकापूजाविधि

श्रान्यत्र मत्कृतो द्रष्टव्यः॥ विस्तरस्तया नाल्लिरम्भतोऽयमेव विजय
दशमीऽयं च यदि उत्तरैव श्रवणयुक्ता तदैवोत्तरा॥ सर्वेषामेषां निर्णये ति केचित
कल्पादेकादशी व्रतवदत्रापि स्तकमध्येपारणं कर्तव्यमित्यन्ये॥ मम
तु प्रतिमाति अत्र न व रात्रेर्हीमस्य पूजारूपत्वेन प्रधानत्वात् तस्य च
नित्यसाध्यत्वेनाशौचेऽप्यनिवारात्॥ नतु शान्तिर्वनं जपमिति निषेधा
त्तत्समाप्तिं विनान्तियमरूपोपवाससमस्यसं न वा दाशौचांतेऽपि मारि
पूर्वकं पारणं कर्तव्यं॥ प्राचीनशिष्टाचारोऽप्येवं॥ उदये दशमी किंचित् सं
पूर्णैकादशी यदि॥ श्रवणर्क्षं यदा कार्या सा तिथिर्विजयाभिधा॥ श्र ७१

वणर्क्षं तु पूर्णायां काकुत्स्थः प्रस्थितो यतः॥ उल्लंघयेयुः सीमानं तद्दि
नर्क्षे ततो नरा इति कश्यपवचनात्॥ संपूर्णैकादशीति वचनात्तदा कर्मका
लव्याप्तिरपि नापेक्षिता॥ अन्यथा सर्वथा श्रवणयुक्तैव दशम्यां तु जनैः सम्य
क् पूजनीयापराजिता॥ ऐशानीं दिशमाश्रित्य अपराह्णे प्रयत्नत
इत्यपराह्णस्य कर्मकालत्वाभिधानात्॥ अस्यां राजाश्रयातः प्रस्था
नमारभ्यास्यामस्यादिनागोपथ्यश्रवणेऽर्कं॥ प्रस्थानिकाविधिं कु
र्यात्तदुक्तप्रकारेणापराजिता पूजां कार्यात्॥ तत्प्रकारश्च मदनरत्नादौ
द्रष्टव्यः॥ सर्वे च जनास्तस्यामपराह्णे ऐशानीं दिशमाश्रित्य सीमानमु

दिग्भागे अपराजितां पूजयेयुः॥ शास्त्रैवं॥ अथाश्विनशुक्ले दशम्यां क्षेमसि
द्ध्यर्थं अपराजितापूजां करिष्य इति संकल्प्य चंदनादिलिखिताष्टदल
मध्ये अपराजितायै नम इत्यपराजितां॥ तद्दक्षिणतः क्रियाशक्त्यै नम
इति जयां॥ तद्वामतः उमायै नम इति विजयां। प्रतिष्ठाप्य ॐ अपराजिता
यै नमः॥ ॐ जयायै नमः॥ ॐ विजयायै नमः॥ इत्यावाहनाद्युपचारैः
संपूज्य प्रणम्य। इमां पूजां यथाशक्त्या निवेदितां। रक्षार्थं
तु समादाय व्रज स्वस्थानमुत्तममिति विसर्जयेयुः॥ आचारात् शमी
पूजयित्वा अमंगलानां शमनीं शमनीं दुष्कृतस्य च॥ दुःस्वप्ननाश ७२

नीं धन्यां प्रपद्येहं शमीं शुभामिति तां प्रार्थयेयुः॥ कचित्तु इमेपि मंत्राः॥ श
मी शमयते पापं शमी लोहितकंटका॥ धारिण्यर्जुनबाणानां रामस्य प्रि
यवादिनी॥ करिष्यमाणयात्रायां यथाकालं सुखं मया॥ तत्र नि
र्विघ्नकर्त्री त्वं भव श्रीरामपूजिते इति। तथा॥ गत्वा तु साद्रता मंत्री श
मीमूलगतां मृदं॥ गीतवादित्रनिर्घोषैस्तामानयेत्स्वगृहं प्रति। ततो भू
षणवस्त्रादि धारयेत् स्वजनैः सहेति॥ ज्योतिषे। कृत्वा नीराजनं रा
जा बालवृद्धैर्यथाक्रमं॥ शोभनं खंजनं पश्येज्जलगोगोष्ठसंनिधा
विति॥ इति विजयादशमी॥ आश्विनशुक्लैकादश्यां कार्त्तिकस्नान

स्कंउक्तः पाद्मे कार्तिकमाहात्म्ये॥ आश्विनस्य तु मासस्य या शुक्लैका
दशी भवेत्॥ कार्त्तिकस्य व्रतानीह तस्यां वै प्रारभेत्सुधीरिति॥ विष्णुना तु
तुलासंक्रांतिमारभ्य कर्तव्यमित्युक्तं॥ तुलामकरमेषेषु प्रातःस्नायी
सदा भवेत्॥ हविष्यं ब्रह्मचर्यं च महापातकनाशनमिति॥ दर्शमाश्व
युजे मासि पूर्णमास्यां समाहित इत्युक्तं॥ मासं समग्रं परयाच भक्त्या स
माप्यते कार्त्तिकपौर्णमास्यामिति हेमाद्रिलिखितं॥ आदित्यपुराणं पूर्णि
मारंभे प्रमाणं॥ काशीखंडे॥ शतसमास्तपस्तप्ता कृते यत्फलमाप्यते॥
तत्कार्त्तिके पंचनदे सकृत्स्नानेन लभ्यते॥ कार्त्तिके विष्णुतीर्थ्ये यो ब्राह्म ७३

चर्यपरायणः॥ स्नात्वा सनुदिते भानौ मानुजातस्य भीः कुत इति॥ स्ना
नमंत्रः॥ कार्त्तिकेहं करिष्यामि प्रातःस्नानं जनार्दन॥ प्रीत्यर्थं तव देवे
श दामोदर मया सह॥ इति॥ अर्घ्यमंत्रः काशीखंडे॥ व्रतिनः कार्त्तिके मासि
स्नातस्य विधिवन्मम। गृहाणार्घ्यं मया दत्तं दनुजेंद्रनिषूदन॥ नि
त्ये नैमित्तिके कृष्ण कार्त्तिके पापनाशने॥ गृहाणार्घ्यं मया दत्तं राधया
सहितो हरे॥ इमौ मंत्रौ समुच्चार्य नरोर्घ्यं प्रयच्छति॥ सुवर्णरत्नपु
ष्पाढ्यं पूर्णसंखेन पुण्यवान्॥ सुवर्णपूर्णपृथिवी तेन दत्ता न संश
यः इति॥ संपूर्णस्नानव्रतानां ब्रह्मपुराणे॥ कार्त्तिकमहोत्स्य॥ एकादश्यां

रिपुतथानत्रपंचसुरात्रिषु॥ दिने दिने च स्नानं वै शीतलासु नदीषु वा।
वर्जितव्या तथा हिंसा मांसमन्नं तथैव चेति काशीखंडे। नारायणस्यां
पंचमदेऽत्र हत्स्नाना तु कार्त्तिके। अमीतकुंरायवपुत्रः उण्यमोनोति
निर्मलज्ञाति॥ तत्रैव॥ कार्त्तिके मासि मे यात्रार्थे: कृतान्नक्तिनम्नरैः।
विंडुतिर्थकतस्नाने स्तेषां मुक्तिर्न दूरतः॥ पाद्मे। कार्त्तिके मासि
तोये स्तु कमलैः कमलेक्षणः॥ जन्म कोटिषु विप्रेंद्र न तेषां कमला
गृहे॥ नारसिंहे: विहायसर्वपुष्पाणि मुनिपुष्पै पाकेशवं॥ कार्त्ति ७
केयोर्चयेद्भक्त्या वाजपेयफलं लभेत॥ पाद्मे॥ तुलसीदललक्षे ७४

ण कार्त्तिके योर्चयेद्धरिं। पत्रे पत्रे मुनिश्रेष्ठ लभते मौक्तिकं फलं॥ स्कां
धा दे॥ निवेद्य केशवे मालां तुलसीकाष्टसंभवां॥ वहते यो नरो भक्त्या तस्य
नैवास्ति पातकं। विष्णुधर्मे। स्पृशेत्तु यानि लोमानि धात्री माल्यं तु कोनृ
णां॥ तावद्वर्ष सहस्राणि वैकुंठे वसती जीवेत॥ माच्च युगं तु यो नित्यं
७५ धात्री तुलसी संभवं॥ वहते कंठदेशे तु कल्पकोटि दिवं वसेत॥ तुल
सीकाष्ट संभूते मालेकमुजनप्रिये॥ विमलामहं कंठे कुरु मा कल
वल्लभं॥ एवं संप्रार्थ्य विधिना मालां कंठगतेर्पितां॥ धारयेत्कार्त्ति
केयो वैसगच्छेद्वैष्णवं पदं॥ स्कांदे॥ का कि वर्जयेत्तद्विदलं वऊ

वीजकं॥ आषमुफलासुराश्च चमकाश्च कुलित्थका॥ विष्णावाराज
माषाश्च क्ष्माण्डको द्विदलं स्मृतं॥ नूतनान्यपिजीलीने सर्वाण्येतानि
वर्जयेत्॥ नारदीये॥ कार्त्तिके वर्जयेत्तैलं कार्त्तिके वर्जयेन्मधु॥ का
र्त्तिके वर्जयेत्कांस्यं कार्त्तिके शुक्तसंधितं॥ तथा॥ कार्त्तिके कृच्छ्रसे
वीयः प्राजापत्यादितोपि वा॥ एकांतरोपवासी वा त्रिरात्रोपोषितोपि
वा॥ षड्द्वादशपक्षेना मासं वा चरेद्वर्णसिद्धि॥ एकभक्तेन नक्तेन तथै
वायाचितेन वा॥ उपवासेन भैक्ष्येण वर्जेत परमं पदं॥ काशीखंडे॥ ऊर्जे
परान्नं क्षौद्रं मादेवान्नमथचावापरः॥ वृन्ताकं सूरणं चैव कूष्माण्डकं शिंबी ७५

श्च वर्जयेत्॥ नारदीये॥ अकृतेन त्वयेयस्तु मासं दामोदरप्रियं॥ ति
र्यग्योनिमवाप्नोति नात्रकार्या विचारणा॥ निर्ण्यामृते पौष्करे तुला
यां तिलतैलेन स्नायां कालेन सम्रगते॥ आकार्तिकेषं यो दद्यान्मास
मेकं हरिं प्रति॥ महतीं श्रीयमाप्नोति रूपसौभाग्यसंपदं॥ वह्निदि
वा ईमांक्षे॥ आदित्यपुराणे दिङ्कारे स्नात्वा वलुमोकिंमूतेश एकादश हरेस्तु रूप
प्रमाणं॥ रूपकृतिं यत्नीय चक्रदारुमयोप्यभावयत स्मयक्षि॥ कृ
ताश्वत स्नोष्टदला कृति स्तुयाजीर्णवे ष्ट दलानुराती॥ तत्कृतिकायां तु
माहा प्रकाशो दीपः प्रदेयो दलगा सायाह्वे॥ निषेधधर्मद्वैतरायन्न

मेदामोदरायाप्यथ धर्मराजे॥ प्रजापतिस्त्वस्तथा सवितस्यः प्रतेस्य
एकाद्यतमस्थिते न्य इति॥ आश्विनपौर्णमास्यां कोजागरव्रतमहार्ण
वैलैंगे॥ आश्विने पौर्णमास्यां तु चरेज्जागरणं निशि॥ कौमुदी सा समाख्
रव्याता कार्या लोके विभूतये॥ कौमुद्यां पूजयेल्लक्ष्मीमिंद्रमैरावते
स्थितं॥ सुगंधिर्निशि सद्वेषो ह्यक्षैर्जागरणं चरेत्॥ निशीथे वरदा
लक्ष्मीः कोजागर्तीति भाषिणी॥ तस्मै वित्तं प्रयच्छामि अक्षैः क्रीडां करो
ति यः॥ नारिकेलोक्षपिटकैः पितॄन्देवान्समर्चयेत्॥ बंधूंश्च प्रीण
येत्तेन स्वयं तदशनो भवेत् इति॥ मदनरत्ने॥ नारिकेलोदकं पीत्वा अ ७९.

क्षैर्जागरणं निशि॥ तस्मै वित्तं प्रयच्छामि को जागर्ति महीतले॥ इति॥ अ
त्रैवाश्वयुजीकर्मोक्तमाश्वलायनैः॥ आश्वयुज्यामाश्वयुजीकर्मेति॥
अत्रैव श्रीत्याग्रयणं। इदं चापमले कार्यमन्यथा न कार्यमित्याग्र
नवहस्वं॥ अस्याकरणे प्रायश्चित्तं कारिकायां॥ अकृताग्रयणो
श्रीयान्नवान्नं यदि वै नरः॥ श्वावैश्वानराय कर्त्तव्यश्चरुः स्मर्णं ज्ञातिस्त्ववे
ति॥ इत्याश्विनकृत्यं॥ कार्त्तिके कृष्णचतुर्थी करकाभिधा॥ संचंद्रो
दयव्यापिनी ग्राह्या॥ दिनद्वये तथात्वे कस्मात्तात्पूर्वा॥ कार्त्तिककृ
ष्णाष्टमी करकाभिधा॥ महाराष्ट्रप्रान्त्येषु च प्रसिद्धा॥ अपिवंशोद

पूर्वव्यापिनी कार्या। दिनद्वये तथात्वे पूर्वा॥ कार्त्तिककृष्णद्वादश्यां गोवत्स
द्वादशीव्रतं॥ तत्र प्रदोषव्यापिन्यां कार्या॥ नरो वा यदि वा नारी॥ वा नक्तं संक
ल्प्य द्वादश्यां गोवत्सं चेतसी लुपक्कमेमपात्रकं अमतो श्रीयाद्रात्रौ किंतमैस त
रस्थले तेच नक्तभोजनविधानात्॥ प्रतीक्षेता गवां भक्त्या गवां गोध्यानतत्पर
इति गोष्ठागतासु संध्यायां गोपूजाविधानाच्च दिनद्वये प्रदोषे सत्वे युग्मे वा
क्यात् वत्सस्य पूजा शिवरात्रिरतः परा विनिर्दिष्टेति। नृपं सराष्ट्रमिति
वचने नक्तनिषेधाच्च पूर्वा ग्राह्या॥ तत्र कर्तव्यमुक्तं भविष्योत्तरे॥ सव
त्सां तुल्यवर्णां विशालिनीं गां पयस्विनीं॥ चंदनादिभिरालिप्य पुष्पमा ७७

ल्याभिरर्चयेत्॥ अर्घ्यं ताम्रमये पात्रे कृत्वा पुष्पाक्षतैः तिलैः॥ चंदनैः
कुंकुमैर्गंधैः पुष्पैः फलैरक्षतैस्तथा॥ पदमूले ततस्तस्या मंत्रेणानेन पांड
व॥ मातारुद्राणामित्येष मंत्रः प्रोक्तो द्विजन्मनां॥ स्त्रीशूद्राणां महाबाहो
मंत्रोयं परिकीर्तितः॥ क्षीरोदार्णवसंभूते सुरासुरनमस्कृते॥ सर्वदेव
मये मातर्गृहाणार्घ्यं नमोस्तु ते॥ दत्वार्घ्यं तज्जलं तुल्यं साक्षतं मूर्ध्नि निक्षि
पेत्॥ ततो माषादिसंसिद्धान्वटकांश्च निवेदयेत्॥ मंत्रः॥ सुरभिस्त्वं जग
न्मातर्नित्यं विष्णुपदे स्थिते॥ सर्वदेवमये ग्रासं मया दत्तमिमं ग्रस॥ ग्रा
सकमंत्रः सर्वत्र देवमये देवि सर्वदेवैरलंकृतं॥ मातर्ममाभिलषितं स

फलं कुरुनंदिनी॥ ततः। तद्दिनेतापि कार्पासकं स्थालीपक्वं युधिष्ठिर गोक्षीरं गो
घृतं चैव दधि तक्रं च वर्जयेद् इति॥ हेमाद्रौ आग्नेये कार्त्तिकः खलु मासो वै
सर्वदेवमयो महान्॥ कृष्णपक्षे विशेषेण तत्र पंचदिनानि तु॥ पुण्यानि ते
षु यद्दत्तं अक्षय्यं सर्वकामिकं॥ नारदः॥ आश्विने कृष्णपक्षे तु द्वादश्या
दिषु पंचसु॥ तिथिषूक्तः सर्वरात्रे नृणां नीराजना विधिः॥ नीराजयेयुर्दे
वांश्च विप्राद्यं गोश्वतुरंगमान्॥ ज्येष्ठान् ज्येष्ठजघन्यांश्च मातृमुख्याश्च
योषित इति॥ आश्विनस्य गौणत्वं चांद्रं निर्णयेण॥ अमावास्यांतमासप
क्षेण आश्विनकृष्णत्रयोदश्यां यमोद्देशेन संध्याकाले च बहिर्दीपदानं
कार्यं तदुक्तं स्कांदे॥ आश्विनस्य कृष्णपक्षे तु त्रयोदश्यां निशामुखे। यम

दीपं बहिर्दद्याद् अपमृत्युर्विनश्यति॥ तत्र मंत्रः॥ मृत्युना पाशदंडाभ्यां का
लेन श्यामया सह॥ त्रयोदश्यां दीपदानात् सूर्यजः प्रीयतां मम इति॥ कार्त्ति
ककृष्णचतुर्दश्यां प्रभाते त्वभ्यंगस्नानं कर्तव्यं॥ तदुक्तं भविष्योत्तरे का
र्तिके कृष्णपक्षे तु चतुर्दश्यां विधूदये॥ अवश्यमेव कर्तव्यं स्नानं नरक
भीरुभिः॥ अपामार्गस्य पत्राणि भ्रामयेच्छिरसोपरि॥ अमावास्यांतमा
सपक्षेण नारदसंहितायामपि॥ इषासितचतुर्दश्यामिंदुक्षयतिथा
वपि॥ ऊर्जादौ स्वातिसंयुक्ते तदा दीपावलीर्भवेत्॥ तैले लक्ष्मीर्जले
गंगा दीपावलितिथौ वसेत्॥ अलक्ष्मीपरिहारार्थमभ्यंगस्नानमाचरे

त्॥ दिनद्वयेपि संकोतावारे पाते दिनद्वये॥ तत्राभ्यंगमदोषाय प्रातःपापाप
नुत्तय इति॥ तत्र चतुर्दशी तावदभ्यंगे दिनोदयप्रातः ऊर्ध्वोः समानार्थ
त्वात्प्रातःकालव्यापिनी ग्राह्या॥ कश्चिद्दिनोदयात् इति पठितं तत्सर्वसंवा
दिवैकवाक्यतयो दाक्षिणात्याचारसंवादी विशुद्धय इति पाठः॥ तत्र चंद्रो
दयकालिकी स्नाने ग्राह्या॥ तत्र मासपूर्वे व प्रातः चंद्रोदये वावर्त्तते सा
श्राः खंडा सर्वकल्पेषु दीपदानांतेषु समा विनैव॥ यातत्तरेव प्रातः
श्चंद्रोदये वावर्त्तते तावत्येव च समा तस्यां स्नाने यमतर्पणं च कार्यं॥
ततश्च तर्पणं कार्यं धर्मराजस्य नामभिः॥ यमाय धर्मराजाय मृत्यवे चां ७९

तकाय च॥ चेव॥ स्नातायकालाय सर्वभूतक्षयाय च॥ औदुंबराय द
ध्नाय नीलाय परमेष्ठिने॥ वृकोदराय चित्राय चित्रगुप्ताय ते नम इति॥ न
विष्णोत्तरे॥ अभ्यंगस्नानानंतरं तर्पणविधानात्॥ तस्य काल विशेषा
दुक्तेश्चाया तु दिनद्वयेपि कालव्यापिनी। तस्या पूर्वस्यामेव स्नानादिकार्यं॥
संपूर्णत्वात्॥ मूल्यः कल्पे कर्मानुरोधश्च॥ या दिनद्वयेपि कालस्पर्शिनास
पि पूर्वैव॥ स काल उत्तरःकालो गौणः॥ पूर्वस्य कर्मण इत्युक्त गौणकालव
व्यापित्वात्॥ पूर्वविद्धचतुर्दश्यां कार्तिकस्यासिते तरे॥ प्रत्यूषसमये स्ना
नं कुर्यात्तत्र प्रयत्नत इति चंद्रोदयधृत वचनाच्च॥ स्नानं तु तत्काले सस्ना

मपि चतुर्दश्यां चंद्रोदय एव विधेनेति॥ तिथ्यादौ च त्रवेधाभावे तूत्तरतिथि
ह्यपत्रे हेपेण शास्त्रतस्तत्र तिथेः सत्वात्॥ अत्र स्नाने विशेषो ब्रह्मपुराणे
अपामार्गमथो तुंबीं प्रपुंनाटमथापरं॥ भ्रामयेत् स्नानमध्ये तु नरक
स्य क्षयाय वै॥ तत्र मंत्रः। सीतालोष्टसमायुक्तं सकंटकदलान्वितं॥
हर पापमपामार्ग भ्राम्यमाणः पुनः पुनरिति॥ मंत्रलिंगात्सीतालोष्टस्यापि
भ्रामणे उक्तैवैः ब्रह्माहित्यं॥ यमतर्पणं चोपवीती नाप्राचीनावीति नावाका
र्यं॥ यज्ञोपवीतिना कार्यं प्राचीनावीतिनाथवा देवत्वं च पितृत्वं च यमस्या ८०
स्तिद्विरूपतेति वचनात्॥ हेतत्क्रि बध्वा कुलकष्ठतिलसक्तुत्रिराव

ल्यादिरूपैर्देवपितृधर्मविकल्पो द्रष्टव्यः॥ हेमाद्रौ भविष्योत्तरे॥ इति स्ना
त्वा प्रदातव्या दीपाः संस्पृश्य देवताः। केचिदिति स्नात्वेत्यस्य स्थाने नरका
य प्रदातव्या इति पठीतं॥ नरकाय नरकासुरोद्देशेनेति वहिर्बः। केचित्तु नरका
कार्थं धूम इतिवत् निवर्त्तप्रयोजनत्वेन व्याख्यातं॥ तत्रैव॥ ततः प्रदोषस
मये दीपान्दद्यान्मनोरमान्॥ ब्रह्मविष्णुशिवादीनां भवनेषु मठेषु चेति॥ य
दा सर्वदिने प्रदोषे चतुर्दशी स्नानयोग्या चोत्तरदिने तदा सर्वदिने प्रदो
षे दीपदानादि कृत्वा परेद्युः स्नानं कार्यं क्रमानुरोधेन कालबाधस्या
न्याय्यत्वात्॥ ज्योतिर्निबंधे॥ तुलासंस्थे सहस्रांशौ प्रदोषे भूतदर्श

यो:॥ उल्काहस्ता नराः कुर्युः पितॄणां मार्गदर्शनं॥ तदोल्काभ्रदर्शनं
त्र॥ शास्त्राशस्त्रहतानां च भूतानां भूतदर्शयोः॥ उज्वलज्ज्योतिषा दे
हं दहेयं व्योपवर्कि नेति॥ तन्मंत्रः॥ अग्निदग्धाश्च ये जीवा येप्यदग्धा
कुले मम॥ उज्वलज्योतिषा दग्धास्ते यांतु परमां गतिमिति॥ तद्विसर्ज
नमंत्रः॥ यमलोकं परित्यज्य आगता ये महालये॥ उज्वलज्योतिषा
वर्त्म प्रपश्यंतो व्रजंतु ते इति॥ अन्यदपि कल्पे लिंगे॥ ततः प्रेतच
तुर्दश्यां भोजयीत्वा तपोधनान्॥ शैवान् विप्रान् धर्मपरान् शिवलो
के महीयते॥ माषपत्रस्य शाकेन भुक्त्वा तत्र दिने नरः॥ प्रेतचतुर्दशी ८१

काले सर्वपापैः प्रमुच्यते॥ नक्तं प्रेतचतुर्दश्यां यः कुर्याच्छिवतुष्टये
न तत्क्रतुशतेनापि प्राप्यते पुण्यमीदृशमिति॥ अमावामवि प्रात
रभ्यंगस्नानं कार्यं॥ एवं प्रभातसमये त्वमावास्यां नराधिप॥ स्नात्वा दे
वान् पितॄन् भक्त्या संपूज्याथ प्रणम्य चेति भविष्योत्तरपुराणे॥ नार
देनापि तिथित्रये दीपावली त्वभिधाय॥ तत्र ने लक्ष्मीरित्यादी
नाभ्यंगस्नानं विहितं॥ पौष्करे॥ स्वातिस्थिते रवाविंदुर्यदि स्वातिगु
तो भवेत्॥ पंचत्वतुरुक स्नायी कृताभ्यंगविधिर्नरः॥ नीराजितां म
लक्ष्मीमर्चयेत् श्रीयमश्नुत इति॥ अमावास्याकर्तव्य दीपदान

कृत्वानुपार्वणश्राद्धमिसन्निधाय ततोपराह्णसमये इतिराजकृत्य
मध्ये॥ दीपमालाकुलेरम्येविध्वस्तध्वांतसंचये॥ प्रादोषेदोषरहिते
शस्तेदोषागमेसुतन्दसन्निध्यानात्छाद्यानंतरंकर्त्तव्यमिति॥ यद्यपि
प्रतीयतेश्राद्धदिनेप्रदोषव्यापिन्यातस्यांतत्संभवत्येव॥ तथापि
यदासर्वेद्युरेवप्रदोषव्यापिन्यमावास्यश्राद्धयोग्याचद्वितीयदि
नेतदासर्वेद्युरेवप्रदोषेलक्ष्मीसंपूज्यदीपदानंकार्यं॥ दिवातत्र
नभोक्तव्यंमतेबालातुराज्जनात्॥ प्रदोषसमयेलक्ष्मींपूजयित्वाततः
क्रमात्॥ दीपवृक्षास्तथाकार्याःशक्त्यादेवगृहेषुचेत्यादित्यपुराणे॥ ८२

तस्यप्रदोषकालसन्निधानात्॥ कालविरोधेचक्रमस्यानादरणीय
त्वात्॥ परमार्थतस्तुस्वकालप्राप्तश्राद्धानुवादत्वात्क्रमस्यात्राविधा
नमेव॥ औत्सर्गिकखंडतिथिरेवप्रायोजनव्यवहारविषयत्वेनतस्य
प्राबल्यात्॥ यदातुदिनद्वयेप्रदोषव्यापिन्यमावास्यातदोत्तरायुग्म
वाक्यात्॥ दंडैकरजनियोगेदर्शस्यस्यात्कादेवन॥ तदाविहायपू
र्वेद्युः परेह्निसुरात्रिकेतितिथितत्त्वोदाहृतवचनात्॥ लक्ष्मीपूजनं
तु॥ ॐ लक्ष्म्यैनमइतिनाममंत्रेणकार्यं॥ पूजानंतरप्रार्थना नमस्तेस
र्वदेवानांवरदासिहरिप्रिया॥ यागतिस्त्वत्प्रपन्नानांसामेभूयात्त्वद

र्शनादिति॥ तथा सुखरात्र्यां प्रदोषे तु कुबेरं पूजयेत्विधे॥ तत्र मंत्रः
धनदायनमस्तुभ्यंनिधिपद्माधिपायच॥ भवंतुत्वत्प्रसादान्मे धन
धान्यादिसंपदइति॥ दीपदानेमंत्रः॥ अग्निर्ज्योतीरविर्ज्योतिश्चंद्रो
ज्योतिस्तथैवच॥ उत्तमः सर्वज्योतीनांदीपोयंप्रतिगृह्यतामिति।
एवंदीपान्दत्वादीपवृक्षांश्चकृत्वाब्राह्मणानन्यांश्चबुभुक्षितान्
भोजयित्वास्वयंकृतोबंधुभिः सहभुंजीत॥ ब्राह्मणान्भोजयित्वा
दौसंतोष्यचबुभुक्षितान्॥ अलंकृतेनभोक्तव्यंनववस्त्रोपशोभि
ता॥ स्निग्धैर्मुग्धैर्विदग्धैश्चनिवृतैः बांधवैः सहेत्यादित्यपुराणात्। २

मदनरत्नेब्रह्मविष्ये॥ एवंगतेनिशीथेतुजनेनिद्रार्धलोचने॥ तावन्नगरनारीभि
स्तूर्यडिंडिमवादनैः॥ शूर्पडिंडिमवादनैरिति क्वचित्पाठः॥ निःकास्यते
प्रहृष्टाभिरलक्ष्मीः स्वगृहांगणादिति॥ अत्र दर्पिकृत्यं। भविष्ये॥ सु
खरात्रेरूपः कार्यःप्रदीपोज्वलितालये॥ सर्वान्बंधून्बंधूंश्चवाचाकु
शलयार्चयेत्॥ प्रदीपचंदनंकार्यंलक्ष्मीसंगच्छेतवेगोरोचनाक्षतंचै
वदद्याद्गेहेषुसर्वतः॥ विश्वरूपस्यभार्यासिपद्मेपद्मालयेशुभे॥ महा
लक्ष्मीनमस्तुभ्यंसुखरात्रींकुरुष्वमे॥ वर्षाकालेमहाघोरेयन्मयादु
ष्कृतंकृतं॥ सुखरात्रिप्रभातेयत्तन्मेलक्ष्मीर्व्यपोहतु॥ यारात्रिः सर्व

रैः दैत्यावीराय नवीयेयं तिथिः प्रोक्ता युधिष्ठिर॥ तत्रैव। लोकस्याविग्र
हस्यात्र प्रायो शुक्लतंडुलैः॥ संस्थाप्य बलिराजानं फलैः पुष्पैश्च
पूजयेत॥ बलिमुद्दिश्य दीयंते दानानि कुरुनंदन॥ यानि तान्यक्षया
ण्याहुर्मयैव संप्रदर्शितमिति॥ अत्र यद्यपि बलिपूजायां कालविशे
षो नोक्तस्तथापि राजकर्त्तव्यतत्पूजायां कृत्येन तत्सर्वमेव हि रात्रौ दैत्य
पतेर्बलेः॥ पूजां कुर्यान्नृपः साक्षाद्भूमौ मंडलके कृते॥ बलिमालिख्य
दैत्येंद्रं वर्णकैः पंचरंगकैः॥ सर्वाभरणसंपूर्णं विंध्यावल्याः समन्वितं।
कुष्मांडबाणजंभोरुमुरुदानवसंवृतं॥ संपूर्णं हृष्टवदनं किरीटो ८५

त्कटकुंडलं॥ द्विभुजं दैत्यराजानं कारयित्वा नृपः स्वयं॥ गृहस्य मध्यशा
लायां विशालायां ततोर्चयेत॥ इति रात्रेः कालत्वाभिधानात्सर्वेषाम
पि स एव कालः॥ शुक्लतंडुलनिर्मया प्रतिमा पिता द्रूपेण॥ बलि
पूजायां मंत्रो वामनपुराणे॥ बलिराज नमस्तुभ्यं विरोचनसुत प्रभो
भविष्येंद्र सुराराते पूजायां प्रतिगृह्यतामिति॥ वस्तुदेशेन दीपदा
नमुक्तं। तत्रैव वामनकर्तृकबलिदानव्याजेन॥ वारं प्रतिपदं प्राप्य
नवचाविमहोत्सवः॥ तत्र लोका नरा हृष्टा हृष्टाः पुष्टाः स्वलंकृताः॥
अर्घ्यदीपप्रदानेन अर्चयिष्यंति मानवा इति॥ इयं च प्रतिपद्बलि

पूजने पूर्वविद्धा ग्राह्या ॥ कालव्याप्तित्वाभावात् ॥ आवली दुर्गने नमीह
वीचे वक्ता शानी ॥ पूर्वविद्धैव कर्त्तव्या शिवरात्रिर्बलेर्दिनमिति वच
नात् ॥ गोपूजनादावपि पूर्वविद्धैव ॥ प्रतिपद्दर्शसंयोगे क्रीडनं तु गवां
मतं ॥ परविद्धेषु यः कुर्यात्पुत्रदारधनक्षयः ॥ या कुरुः प्रतिपन्मिश्रा
तत्र गाः पूजयेन्नृप ॥ पूजनात्रीणि वर्द्धंते प्रजा गावो महीपतिरिति
देवलवचनात् ॥ यद्यपि पूर्वाह्ले क्रीडनेगवामिति वचनात्प्रातः
कालव्यापिन्युत्तरैव गोक्रीडनादौ प्रतिभाति तथापि ॥ गवां क्रीडादि
ने यत्र रात्रौ दृश्येत चंद्रमाः ॥ सोमो राजा पशून्हंति सुरभी पूजकं तथे ८९

ति देवलेन ॥ प्रतिनिषिद्धत्वात्सा त्याज्या ॥ चंद्रदर्शनाभावे क्वचि
दुत्तरापि ग्राह्येत्युक्तं ॥ त्रियामगा दर्शतिथिर्भवेच्चेत्साद्वित्रियामा प्र
तिपद्विवृद्धौ ॥ दीपोत्सवेऽत्ते मुनिभिः प्रदिष्टेऽतोऽन्यथा पूर्वयुते विधे
ये इति कार्त्तिके शुक्लपक्षे तु विधातव्यं भवेत् ॥ नारी नीराजनं प्रा
तः सायं मंगलमालिकेति ब्रह्मपुराणोक्तं ॥ तु कर्म स्वाप्यायामपि द्वि
तीयाविद्धायामेव प्रतिपदि कर्त्तव्यं ॥ निर्णयामृते स्कांदे ॥ प्रातर्गोव
र्द्धनं पूज्य द्यूतं चापि समाचरेत् ॥ मंडनीयास्तथा ॥ गावः पूज्याश्चा
वाहदोहनादिति ॥ गोवर्द्धनपूजामंत्र ॥ गोवर्द्धन धराधार गोकुलत्राण

णकारकः॥ विष्णुवाक्कृतौ छायगतां कोटिप्रदो भवेति॥ गोष्ठ्यां मंत्राः॥ ल
क्ष्मीर्या लोकपालानां धेनुरूपेण संस्थिता॥ घृतं वहति यज्ञार्थे मम पापं व्य
पोहतु॥ अग्रतः संतु मे गावो गावो मे संतु पृष्ठतः॥ उक्तं तत्र दिवा प्रातः प्र
तिपत् घटिकाद्वयं॥ तस्यां नीराजनं कार्यं सायं मंगलमालिकेति ब्रह्मवि
ष्णुपुराणात्॥ कार्तिके शुक्लपक्षाद्यावमावास्यां घटिद्वयं॥ देशानगं
यान्नैव कुर्यान्मंगलमालिकामिति देवीपुराणे अनासुका या निषे
धाच्च॥ कार्तिकशुक्लद्वितीया यमद्वितीया॥ तस्यां भ्रातृगृहे भोजनं का
र्यं। तथा च लिंगपुराणे कार्तिके तु द्वितीयायां शुक्लायां भ्रातृगृहे भोज ८७

नं॥ या न कुर्याद्विनश्यंति भ्रातरः सप्तजन्मसु तस्या इति शेषः॥ भविष्यो
त्तरेपि॥ कार्तिके शुक्लपक्षे तु द्वितीयायां युधिष्ठिर॥ यमो यमुनया पूर्वं भोजि
तः स्वगृहे स्वयं॥ अतो यमद्वितीया सा प्रोक्ता लोके युधिष्ठिर॥ अस्यां निज
गृहे पार्थ न भोक्तव्यमतो बुधैः॥ यत्नेन भगिनी हस्ताद्भोक्तव्यं पुष्टिवर्द्ध
नं दानानि च प्रदेयानि भगिनीभ्यो विशेषतः॥ स्वर्णालंकारवस्त्राणि
पूजासत्कारभोजनैः। सर्वभगिन्यः संपूज्या अभावे प्रतिपन्नकाः॥ प्र
तिपन्नकाः प्रतिपन्ना भगिनीत्वेन व्यवहृता इत्यर्थः। पितृभगिन्याद
ति हेमाद्रिः॥ तथा॥ यमं च चित्रगुप्तं च यमदूतांश्च पूजयेत्॥ अर्घ्यः श्रा

त्रा प्रदातव्यो यमाय सहजद्वयैः॥ भ्रातृभगिनीभिरिति सर्वार्थः॥ अर्घ्यमंत्रः
एह्येहि मार्त्तंडज पाशहस्त यमांतकालोकधरामरेश॥ भ्रातृद्वितीया
कृतदेवपूजां गृहाण चार्घ्यं भगवन्नमस्ते॥ पूजनांतरनाममंत्रः॥ धर्मराज
नमस्तुभ्यं नमस्ते यमुनाग्रज। पाहि मां किंकरैः सार्द्धं सूर्यपुत्र नमोस्तु ते
यमस्वर्नमस्तेस्तु यमुने लोकपूजिते॥ वरदा भव मे नित्यं सूर्यपुत्रि न
मोस्तु ते इति॥ क्वचित् भ्रातृभोजने मंत्रः॥ भ्रातस्तवानुजाताहं भुंक्ष्व भ
क्तमिमं शुभं॥ प्रीतये यमराजस्य यमुनाया विशेषत इति॥ ज्येष्ठा तु
भ्रातस्तवाग्रजाहमिति पठेत्॥ कार्त्तिकशुक्लचतुर्थ्यां नागव्रतं॥ तथा

च कार्त्तिकशुक्लपक्षमुपक्रम्य कौमी॥ तिथौ शुक्लयायां तु समुपोष्य य
थाविधि॥ शंखपालादिकनागानां शेषस्य च महात्मनः॥ पूजा कार्या तु
ष्पगंधपत्रीपुष्पार्चनपूर्वकमिति॥ एतच्च मध्याह्नव्यापिकायां कार्यं॥
युगं मध्यंदिने यत्र तत्रोपोष्य फणीश्वरान्॥ क्षीरेण प्यवंचाप्यां पारयेत्प
यतो नरः॥ विषाणि तस्य नश्यंति न तं हिंसंति पन्नगाः॥ इति स्कांदपु
राणात्॥ कार्त्तिकशुक्लषष्ठ्यां कलविशेषो भविष्योत्तरे॥ षष्ठ्यां फला
शनो राजन् विशेषात्कार्त्तिके नृप॥ राज्यच्युतो विशेषेण स्वराज्यं ल
भते चिरात्॥ दत्वार्घ्यं कार्त्तिकेयाय स्थित्वा वै दक्षिणामुखः॥ दध्ना

घृतोदकैः पुष्पैः मंत्रिणानेन सुव्रत॥ सप्तर्षिदारजस्कंद सेनाधिपम
हाबल॥ रुद्रोमाग्निज षड्वक्त्र गंगागर्भ नमोस्तु ते॥ प्रीयतां देवसेना
नीः संपादयतु हृद्गतं॥ दत्वा विप्राय चामान्नं यच्चान्यदपि वर्त्तते॥ प
श्चाद्भुंक्ते त्वसौ राज्ञा नमिं कृत्वानुनाजनमिति॥ कार्त्तिक शुक्लनव
मियुगादिः॥ निर्णयः पूर्वविद्धः॥ अस्यामेव विष्णुस्त्रिरात्रारंभः॥ हेमा
द्रौ पद्मपुराणे॥ कार्त्तिके शुक्लनवमीमवाप्य विजितेंद्रियः॥ हरिवि
धाय सौवर्णं तुलस्यां सहितं विभुं॥ पूजयेद्विधिवद्भक्त्या व्रती तत्र दि
नत्रयं॥ एवं यथोक्त विधिना कुर्याद्वैवाहिकं विधिमिति॥ कार्त्तिके शु ८२

क्ल एकादशी कृत्यं नारदीये॥ कार्त्तिके शुक्लपक्षस्य कृत्वा ह्येकादशीं
नरः॥ प्रातर्दत्वा शुभान्कुंभान्स याति हरिमंदिरं॥ मदनरत्ने वारा
हे शुक्लपक्षे प्रकम्य॥ एकादशी सा मत्युक्ता कार्त्तिके मासि भामिनी॥
उत्तराभाद्रसंयोगे अनंता सा प्रकीर्त्तिता॥ तस्यां यत्क्रियते जन्तोः सर्वमा
नंत्यमश्नुते॥ अनंतपुण्यफलदा तेनानंता स्मृता प्रिये इति॥ अस्या
मेव प्रबोधोत्सव उक्तो ब्राह्मे॥ एकादश्यां च शुक्लायां कार्त्तिके मासि
केशवं॥ प्रसुप्तं बोधयेद्रात्रौ श्रद्धाभक्तिसमन्वितः॥ नृत्यैर्गीतैस्तथा
वाद्यैः ऋग्यजुःसाममंगलैः॥ वीणापणवशब्दैश्च पुराणश्रवणेन

च॥ वासुदेवकथाभिश्चस्तोत्रैरन्यैश्च वैष्णवैः॥ इति भविष्योत्तरेपि॥ कार्त्ति
के शुक्लपक्षस्य एकादश्यां समाहितः॥ मंत्रेणानेन राजेंद्र देवमुत्थापये
द्द्विजः॥ वाराहपुराणे तु द्वादश्यां प्रबोधोत्सव उक्तः॥ रामार्चनचंद्रिका
यामपि॥ पारणाहे पूर्वरात्रे घंटादिं वादयन्नुदीरिति॥ प्रबोधमंत्रवा
राहे॥ ॐ ब्रह्मेंद्ररुद्राग्निकुबेरसूर्यसोमादिभिर्वंदितवंदनीय॥ बुध्य
अ स्व देवेश जगन्निवास मंत्रप्रभावेन सुखेन देव॥ इयं तु द्वादशी देव प्रबो
धार्थं तु निर्मिता॥ त्वयैव सर्वलोकानां हितार्थं शेषशायिना॥ त्वयि सु
प्ते जगन्नाथ जगत्सुप्तं भवेदिदं॥ उत्थिते चेष्टते सर्वमुत्तिष्ठोत्तिष्ठ मा २०

धव॥ उत्तिष्ठोत्तिष्ठ गोविंद त्यज निद्रां जगत्पते॥ त्वयि सुप्ते जगत्सुप्तं उत्थि
ते चोत्थितं जगदिति॥ एवं प्रबोध्य पुष्पांजलिं दद्यात्॥ तत्र मंत्रः॥ गता
मेघा वियच्चैव निर्मलं निर्मला दिशः॥ शारदानि च पुष्पाणि गृहाण मम
केशवेति॥ अस्यामेव चातुर्मास्यव्रतसमाप्तिः॥ तदुक्तं वाराहे॥ चतु
र्धायिहि तच्चीर्णं चातुर्मास्यव्रतं नरः॥ कार्त्तिके शुक्लपक्षे तु द्वादश्यां
तत्समापयेदिति॥ चतुर्दश्येकादशीद्वादशीपौर्णिमाकर्कसंक्रांतिष्वा
रब्धमित्यर्थः॥ भविष्योत्तरे॥ चातुर्मास्ये तु यत्त्यक्तं तद्भोज्यादिकं
चयत्॥ चतुरो वार्षिकान्मासान्नियमो यस्य यत्कृतः॥ कथयित्वा द्वि

ऽन्यस्तं दद्यात्कल्पासदक्षिणं॥ दत्वा विसर्जयेद्विप्रं ततो भुंजीत च स्व
यमिति॥ व्रतसमापने मंत्रः सनत्कुमारेणोक्तः॥ इदं व्रतं मया देव कृतं
प्रीत्यै तव प्रभो॥ न्यूनं संपूर्णतां यातु त्वत्प्रसादाज्जनार्दनेति॥ अस्यां रे
वतीनक्षत्रांत्यपादयोगे पारणं न कार्यं। सुप्तिप्रबोधपरिवर्त्तनमेव व
र्ज्यमिति प्राग्लिखितवचनात्॥ इदं च शुक्रास्तादावपि कार्यं नित्यक
त्वात्॥ इयं च मन्वादिः॥ कृतश्च पूर्वाह्णव्यापिनी ग्राह्या॥ कार्त्तिकेशु
क्लचतुर्दश्यां पूर्वदिने कृतोपवासः॥ अरुणोदयमात्रिकएव स्नात्वा वि
श्वेश्वरं पूजयेत्॥ तस्या विश्वेश्वरप्रतिष्ठादिनत्वात्॥ तथा च सनत्कु ९१

मारसंहितायां॥ नंदिकेश्वर उवाच॥ वर्षे च हेमलंबाख्ये मासि श्रीपति
कार्त्तिके। शुक्लपक्षे चतुर्दश्यामरुणाभ्युदयं प्रति॥ महादेवतिथौ ब्रा
ह्मे मुहूर्ते मणिकर्णिके॥ स्नात्वा विश्वेश्वरो देव्या विश्वेश्वरमपूजयेत्॥
संक्षेपंज्योतिषस्तस्य प्रतिष्टां रम्यं तदाकरोत्॥ ततः प्रभाते विमले कृत्वा
पूजां महाद्भुतां॥ दंडपाणे महेधाम्नि वनेस्मिन्कृतपारणा इति॥ अत्र
अन्यप्येवं कुर्यादिति परकृतिरूपेणार्थवादेन विधिः॥ कल्पः॥ ते॥ का
शीखंडे॥ कार्त्तिकस्य चतुर्दश्यां विश्वेशं यो विलोकयेत्॥ स्नात्वा चोत्त
रवाहिन्यां न तस्य पुनरागतिः॥ इयमेव वैकुंठसंज्ञा॥ अस्यां रात्रौ सोप

वासेन हरिपूजनं कार्यं॥ तदुक्तं हेमाद्रौ भविष्ये॥ कार्त्तिकस्य सिते पक्षे च
तुर्दश्यां नराधिप॥ सोपवासस्तु संपूज्य हरिं रात्रौ जितेंद्रिय इति॥ अत्र क
र्मकालव्यापिलाभे दिवा पूर्वा ग्राह्या॥ अत्रैव कार्त्तिकव्रतोद्यापन
मुक्तं पाद्मीय कार्त्तिकमाहात्म्ये॥ अथोर्जव्रतिनः सम्यगुद्यापनविधि
श्शृणु॥ ऊर्जशुक्लचतुर्दश्यां कुर्यादुद्यापनं व्रती॥ व्रतसंपूर्णतार्थाय वि
ष्णुप्रीत्यर्थमेव च॥ कार्त्तिकी पौर्णमासी सामान्यनिर्णयोक्ता॥ इयं च
मन्वादिः॥ अत्र विशेषो हेमाद्रौ ब्राह्मे॥ पुण्या महा कार्त्तिकी स्याज्जीवें
द्वोः कृत्तिकास्थयोः॥ पाद्मे॥ विशाखासु यदा भानुः कृत्तिकासु च चंद्र २२

मा॥ स योगः पद्मको नाम पुष्करे त्वतिदुर्लभः॥ पद्मकं पुष्करे प्राप्य कपिलां यः प्र
प्रयच्छति॥ स हित्वा सर्वपापानि वैष्णवं लभते पदं॥ यमः॥ कार्त्तिक्यां पुष्करे
स्नातः सर्वपापैः प्रमुच्यते॥ अन्यत्रापि॥ आग्नेयं तु यदा ऋक्षं कार्त्तिक्यां
भवति क्वचित्॥ महती सा तिथिर्ज्ञेया स्नानदानेषु चोत्तमा॥ यदा तु याम्यं मा
भवति ऋक्षं तस्यां तिथौ क्वचित्॥ तिथिः सापि महापुण्या मुनिभिः परि
कीर्त्तिता॥ प्राजापत्यं यदा ऋक्षं तिथौ तस्यां नराधिप॥ सा महाकार्त्ति
की प्रोक्ता देवानामपि दुर्लभेति॥ अस्यामेव संध्याकाले त्रिपुरदाहो
त्सवो मार्गवर्त्तनदीपिकायां पौर्ण[illegible] मास्यां तु संध्यायां कर्त्तव्यस्त्रैपुरो

स्तवः॥ दद्यादनेन मंत्रेण प्रदीपं च सुरालये॥ कीटाः पतंगा मशकाश्च वृ
क्षाजले स्थले ये विचरंति जीवा॥ दृष्ट्वा प्रदीपं न च जन्म भागिनो भवंति
नित्यं श्वपचा हि विप्रा इति॥ अस्यामेव मत्स्यावतार उक्तः पाद्मे कार्त्ति
कमाहात्म्ये। वरान्दत्वा यतो विष्णुर्मत्स्यावतार रूपमजवंत तः॥ तस्यां द
त्तं कृतं जप्तं तदक्षय्यफलं स्मृतमिति॥ अस्यां वृषोत्सर्गं कृत्वा नक्तं का
र्यं॥ उक्तं मात्स्ये॥ कार्त्तिक्यां यो वृषोत्सर्गं कृत्वा नक्तं समाचरेत्॥ शैवं प व
पदमवाप्नोति शिवव्रतमिदं स्मृतमिति॥ इति कार्त्तिककृत्यानि॥ स्रणि
म्यंत मार्गशीर्षकृष्णाष्टम्यां भपराके भैरवोत्पत्तिः॥ यत्तु॥ नित्ययात्रा २२

दिकं कृत्वा मध्याह्ने संस्थिते रवौ विति शिवरहस्यं तन्मध्ये वक्तकृत्या नि
धाना दविरुद्धं॥ काशीखंडे। मार्गशीर्षासिताष्टम्यां कालभैरवसंनिधौ॥
उषति कार्त्तिककृत्या निशि जागरं कुर्यात्सर्वपापैः प्रमुच्यते॥ त्रिस्थ
लीसेतो॥ कृत्वा च विविधां पूजां महासंभार विस्तरैः॥ नरो मार्गसिता
ष्टम्यां वार्षिकं विघ्नमुत्सृजेत्॥ अत्र उपवासो धर्मदानं जागरणं रात्रौ य
मचतुष्टयपूजये त्यादि शिवरहस्ये उक्तं॥ इयं च सर्वविद्धा ग्राह्या॥ क
ल्पद्रुमात त्वानुनुवृत्तलात्काव्व्यासिन्नानाच्च॥ मार्गस्तु कृष्ण प्रतिप
दि धान्यव्रतं तदुक्तं वाराहपुराणे॥ नक्तव्रतमिदं कुर्याद्रात्रौ वि

प्रमजयेत॥ वैश्वानरायपाशेवयमन्नएषेवोद्दरंतयाहविर्भुजेतयोर
श्वप्रविपतिदेयंवेभुजे॥ सिवत्संमितिवश्चिरोजन्मनविंतिसर्वतः
श्रास्मैवैविंविधानेनदेवदेवजनार्दनं॥ अत्रवैश्वानरायेत्यादि
यंत्रैर्क्तचतुरस्तात्होमंकुर्यात॥ ततस्तूपावंशवान्मत्रंजीतयत्न
नसंयुतं॥ कथंपञ्चोप्यैवमेवपातुमेस्यांतुपावकवैजाश्रुवत्नुजीया
त्यासससंघृतंलघु॥ वर्णादिश्रुसक्तुस्वततश्चैवंसमापयेसयात्तेवत्र
तेवनिंक्वाबलंकारयेत्नपाकवस्त्रास्त्रयुगछत्ररक्तपुष्पानुले
पनं॥ एवंविधायब्राह्मणायदद्यात ततत्रदानमंत्रः धान्योसिधन ९४

न्यकर्मसिधन्योस्मधनवान्नवधन्येनानेनचीर्णेनव्रतेनस्यांसदासु
खीति॥ मार्गशुक्लपंचम्यांनागपूजोक्तास्कांदे॥ शुक्लामार्गशिरेपुण्या
वंक्र श्रावणेयाचपंचमी॥ अनदानेफल्वनागलोकप्रदायिनीति॥ इयंचो
त्तरविद्धाकार्या॥ पंचमीनागपूजायांकार्याषष्ठीसमन्विता॥ तस्यांतु
तुविनानगाइतरासाचतुर्थिकेतिवचनात॥ मार्गशुक्लषष्ठ्यामहा
रिपूजा॥ साचोत्तरविद्धाकार्या॥ षण्मुन्यारितियुग्मवाक्यात॥ इयमे
वयोगविशेषणचंपाभिधा॥ तदुक्तंमल्हारिमाहात्म्ये॥ मार्गेमासिपरे
शुक्लाषष्ठीवैधृतिसंयुता॥ रविवारेणसंयुक्तासंचंपेतिकीर्तित

ति॥ इतियं योगवशेन सर्वपिरावाप्ता ह्या॥ इयमेव स्कंदषष्ठी॥ सा च स
र्वा॥ कृष्णाष्टमी स्कंदषष्ठी शिवरात्री चतुर्दशी॥ एताः पूर्वयुता कार्या
इति वचनात्॥ मार्गशुक्लचतुर्दश्यां कार्यां पिशाचमोचनयात्रा॥ मा
र्गशिर्षपौर्णमास्यां दत्तात्रयोत्पत्तिः। तदुक्तं स्कांदे सह्याद्रिखंडे॥ मार्गशि
र्षे तथा मासि दशमेऽह्नि सुनिर्मले॥ मार्गशीर्षे युते पौर्णमास्यां तु शु
चवासरे॥ जनयामास देदीप्यमानं पुत्रं मती॥ श्रुत्वं॥ तं विष्णुमागतं
ज्ञात्वा अत्रिर्नामाकरोत् स्वयं॥ दत्तवान्स्वस्य पुत्रत्वात् दत्तात्रेय इति २५
स्मरमिती दशमे मासीत्यन्वयः॥ इयं पूर्वविद्धा ग्राह्या॥ वृद्धसमाचा

रात्॥ नमांतमासपक्षेण मार्गकृष्णा अष्टमी अष्टमीकं॥ हेमंतशिशि
रयोश्चतुर्णामपरपक्षाणामष्टमी षकारस्त्याश्वलायनवचनात्॥ त
त्र पूर्वदिने पूर्वेद्युः श्राद्धं॥ उत्तरदिने च अन्वष्टकं॥ पूर्वेद्युः पितृभ्यो द
द्यात् अपरेद्युरन्वष्टक्यमित्याश्वलायनसूत्रात्॥ अत्राष्टमी॥ अ
पराह्नव्यापिनी ग्राह्या॥ पूर्वेद्युरन्वष्टक्यमित्याश्वलायनसूत्रात्॥
योस्त्वष्टम्या निरोधेन निर्णयः॥ अत्र छांदोगानां कौवाश्वलायनः॥
अप्यनडुह्येयवसमाहरेदग्निना वाकक्षमुमोषेदेषामेष्टकेतिनत्वे
वानष्टकः स्यादिति॥ आश्वलायनप्रायश्चित्तमुक्तमग्निविधाने॥ पत्नि

घृतैर्जयेन्मंत्रं शतवारं तु तद्दिने॥ अन्वष्टक्यं यदा शून्यं संसर्गीयाति
सर्वथेति॥ मार्गादिषु मलमासपाते तत्राष्टकानकार्याचतुर्णामि
त्युक्तत्वादित्युक्तं नारायणवृत्तौ॥ तक्कणजयाष्टकाश्राद्धोपाकर्मा
घपिकर्म यत॥ स्पष्टमासविशेषाख्याविहितं वर्जयेन्मलइति
काम्यकर्मत्याज्याश्चाद्दं मार्गकृत्यं — — — शुक्लद्वितीयायामीएप्येव
तं॥ विष्णुधर्मोत्तरे गो मृगो ऽर्केकेनस्वस्ताल्लाभ्युक्तं वा सास्त्रयास्तो
त्रं वा ले दोगंधमाल्यानुलेपनैः धूपदीपनमस्कारस्रुपकान्न—
परमान्नगुडलवणादिभिः पूजां कुर्यात॥ ब्राह्मणां स्वामि सज्जये २६

स्नानारंभ उक्तो ब्राह्मेएकादश्यां शुक्लपक्षे पौषमासे समारभेत॥ द्वादश्यां
पौर्णमास्यां वा शुक्लपक्षे समाप्तियाद्दिति॥ माघइति॥ शेषः पद्मोत्तरमाह विष्णुः
दर्शेवा पौर्णमासीवाप्रारभ्य स्नानमाचरेत॥ पुण्यान्यहानि त्रिंशत्तु मेके रस्थे
दिवाकरइति। स एव॥ तुलामकरमेषेषु प्रातःस्नायि सदा व्रत॥ हविष्यं
ब्रह्मचर्यं चमहापातकनाशनमिति॥ स्नानकाल उक्तो ब्राह्मे। अरुणोद
येत्वसंप्राप्ते स्नाने काल्ये विचक्षणः॥ माधवीसि युग्मं ध्यायन्नमस्कृतिसु
धिरं सजीतइति॥ अरुणोदयमारभ्य प्रातःकालेवधिः स्मृतो॥ माघस्ना
नव्रता पुण्यं क्रमातत्र च धारिणी उत्तमंतु सनक्षत्रं लुप्ततारं तु मध्यम। ९७

ता॥ वैशाखा॥ अस्तं नायाति इंदुः तावद्दारसमाहारश्च अधः शय्या॥ एवं
वर्षमेकं तु उद्यापनं कुर्यात् तु बालिदोः सुजनं कृत्वा॥ पूर्वस्मृत विशेष
तः॥ वाससी रसकं च नवं कांचनं द्विजातये॥ तत्वा तु पूर्ववदुक्तो व्रत
पारगतो न वेत्॥ व्रतेनानेन धर्मज्ञो रोगमतं व्यपोहति॥ पौषशु
क्लाष्टम्यां विशेषः कृत्स्नकल्मतरेशेन विद्ध्य॥ पौषे मासि यदा देवि
शुक्लाष्टम्यां बुधो भवेत्॥ तस्यां स्नानं जपो होमः स्तर्पणं विप्रभो
जनं॥ मत्प्रीतये कृतं देवी सततसाहस्री कं भुवे॥ अत्र संहितास्ना
योगे तुं एव तमत्व पौषशुक्लैकादशी मन्वादीः॥ अस्यामेव माघ ९७

सवितर्युदिते मुच्यते तोह्यनं पकीर्तितमिति॥ एवं संनि॥ संप्राप्ते माघमासे तु
तपस्विजनवल्लभे॥ क्रोशंति सर्वकाशिणी समुज्ज्वलति भास्करे॥ माघमासि
रटंसा पापं किंचिद्भन्युदितेरवौ॥ ब्रह्मघ्नं वा सुरापं वा कपतंतं पुनीमहे स्ना
हिमाद्रदियदि वचनात्॥ न्यरात्र विषमालितथा तैस्त्रेव॥ सडागिशु तुवा
स्नायात्कल्पे चांडश्रितेमघा॥ माघमासे वरारोहे शसोवेनिम्नगाजले॥ अं
डाश्रिते त्वयं विशेषः॥ संस्थितोयं महावेग नवकुं उस्थितं तथा॥ युवाना॥
ताडिम रात्रौ गंगा स्नानसमं स्मृतं॥ स्नातो वक्रिंस्नातो वा कथंचन॥ सेवे
तापि तु हे प्रार्थना शीतार्थ कथंचन॥ स्नानविधिर्महिविष्णुः॥ तत्रचो

त्यर्थ्यं यन्नियमं गृह्णीयाद्विधिपूर्वकं॥ माघमासमिमं पूर्णं स्नास्येऽहं देव माध
व॥ तीर्थस्यास्य जले नित्यमिति संकल्प्य चेतसि॥ ततः स्नात्वा शुभे तीर्थे द
त्वा शिरसि वै मृदं॥ वेदोक्तविधिना राजन् सूर्यायार्घ्यं निवेदयेत्॥ पितॄ
णां तर्पयित्वा तु अवतीर्य ततो जलात्॥ शंखचक्रधरं देवं माधवं नाम पू
जयेत्॥ वह्नौ हुत्वा विधानेन ततस्त्वेकाशनो भवेत्॥ भूशय्या ब्रह्मचर्ये
ण शक्तः स्नानं समाचरेत्॥ अशक्तस्य धनाढ्यस्य स्वेच्छा सर्वत्र कथ्यते॥
धनाढ्यस्य॥ बहु धनदानं कुर्वतः॥ अवश्यमेव कर्तव्यं माघस्नान
मिति श्रुतिः॥ तिलस्नायी तिलोद्वर्ती तिलहोमी तिलोदकी॥ तिलभुक्ति

लदाता च षट्तिला नावसीदति॥ तिलैस्तैलमामलकाश्चैव तीर्थे देयास्तु
नित्यशः॥ तथा प्रज्वालयेद्वह्निं सेवनार्थं द्विजन्मनां॥ एवं स्नात्वावसाने
तु भोज्यं देयमवारितं॥ भोजयेद्द्विजदांपत्यं तस्मै दद्याच्च भूषणैः॥ कंब
लाजिनरत्नानि वासांसि विविधानि च॥ चोलकानि च देयानि प्रच्छादन
पटानि च॥ उपानहौ तथा गुह्यमोचकौ पापमोचकौ॥ अनेन विधिना द
द्यान्माधवः प्रीयतामिति॥ सवित्रे प्रसवित्रे च परं धाम जले मम॥ त्वत्तेज
सा परिभ्रष्टं पापं यातु सहस्रधा॥ दिवाकर जगन्नाथ प्रभाकर नमो
स्तु ते॥ परिपूर्णं करिष्येऽहं माघस्नानं तवाज्ञया॥ अयं समारंतं पं नं

मंत्रमरुणाय दनि दातव्यास्तिलाः शर्करयान्विताः ॥ माघवसाने सुस्नाने षड्रसं
भोजनं तथा ॥ सूर्यो मे प्रीयतां देवो विष्णुमूर्तिर्निरंजनः ॥ दंपत्योर्वाससी सू
क्ष्मे सप्तधान्यसमन्विते ॥ त्रिंशत्तु मोदका देयाः शर्करातिलसंयुताः ॥ ना
रायणे तिलानां तु चतुर्थः शर्कराराजः ॥ अनन्तं गीकरोदे सर्वं मसंनये
दतीति ॥ इति माघस्नानविधि ॥ मकरसंक्रमे परा विंशति घटिकाः पुण्याः
तथा च वृद्धवसिष्ठः ॥ अतीतानागते पुण्ये द्वे उदग्दक्षिणायने ॥ त्रिंशत् च
कर्कटके नाड्यो मकरे विंशतिः स्मृता इति ब्रह्मवैवर्ते तु ॥ मकरे तु दश ॥
धिका इति पाठः ॥ रात्रौ मकरसंक्रमे तु परदिने सूर्योदयोत्तरं प्रहरमिहई ९९

केपुण्यं ॥ तथा च रविविष्णोत्तरे कारस्तु केतु परित्यज्य प्रथमं संक्रमं तेरविः ॥
प्रदोषे वार्द्धरात्रे वा स्नानं दानं परेहनीति ॥ वृद्धगार्ग्योपि ॥ यदास्तमय
वेलायां मकरं याति भास्करः ॥ प्रदोषे वार्द्धरात्रे वा स्नानं दानं परेहनी
ति ॥ परेहनी तु केपि पूर्वी घटिका ॥ आसंन्नसंक्रमं पुण्यं दिनार्द्धं स्ना
नं दानयोरिति सामान्यवचनात् ॥ अत्र कूर्मी शोवरस्ये ॥ तस्यां क
स्नानं संक्रांतौ तिलैः कार्यं दत्तं मे स्तुतैः ॥ तिलान् दद्याश्च विप्रेभ्यः सर्वदैवोत्तरोय
णे ॥ तिलतैलेन दीपाश्च देया शिवगृहेषु तु ॥ कालिकापुराणे ॥ वो
मं तिलैः प्रकुर्वीत सर्वदैवोत्तरायणे ॥ तत्पो देवाय विप्रेभ्यो नाटके

न समं दहेत्॥ उत्तरायणमासाद्य नरः कस्मात्स शोचतीति॥ पौष्यन्या
वा सु सप्तम्यष्टमीनवमीषु पूर्वेद्युरष्टकान्वष्टकाः कार्याः॥ माघकृष्ण
द्वादश्यां तिलद्वादशीव्रतं॥ ब्रह्मपुराणे॥ माघे तु कृष्णद्वादश्यां यमो हि
भगवान् पुरा॥ तिलानुत्पादयामास समयः कृत्वा सुदारुणमित्युपक्रम्य॥
तस्यामुपोषितः स्नातस्तिलैस्तस्यां यजेद्धरिः तिलतैलेन दीपाश्च देया
देवगृहेषु च॥ निवेद्ये तिला नेवहीत व्याश्च तनास्तिलाः॥ तिलान्दद्या
च विप्रेभ्यो जुहुयाच्च ततस्तिलानिति॥ माघकृष्णचतुर्दश्यां यमतर्पणं १०
माहेमाद्रौ यमः॥ अनर्कामुदिते काले माघकृष्णचतुर्दशी॥ स्नातः

संतर्प्य तु यमं सर्वपापैः प्रमुच्यत इति॥ पौषमाघामायामर्द्धोदयो नाम योग
विशेषो मदनरत्ने भारते उक्तः॥ अमार्कपातश्रवणैर्युक्ता चेत्पुष्यमाघयोः॥
अर्द्धोदयः स विज्ञेयः कोटिसूर्यग्रहैः समः॥ दिवैव योग शस्तोयं न तु रात्रौ क
दाचनेति॥ पुष्यमाघयोर्मध्यवर्तिनी अमा अमावास्येत्यर्थः॥ स्कांदे॥ मा
घमास्यां व्यतीपाते आदित्ये विष्णुदैवते॥ अर्द्धोदयं तदित्याहुः सहस्रा
र्कग्रहैः सममिति॥ तत्रैव॥ अर्द्धोदये तु संप्राप्ते सर्वं गंगासमं जलं॥ शु
द्धात्मानो द्विजाः सर्वे भवेयुर्ब्रह्मसंमिताः॥ यत्किंचिद्दीयते दानं तद्दानं मेरु
संमितमिति॥ अत्र दानविशेषो निर्णयामृते स्कांदे॥ चतुःषष्टिपलन्तु

रव्यमम तच्च तत्र कारयेत्॥ चत्वारिंशत्पलं वापि पंचविंशतिरेव वेति॥ एत
च्च कांस्यमयं पात्रं॥ एवं सुघटितं कृत्वा कांस्यभाजनमुत्तमं॥ मिन्दुकवोग
तथा॥ निधाय वायसं तत्र पत्रवद्दलं लिखेत्॥ पत्रस्य कर्णिकायां तु कर्म
मात्रं सुवर्णकं॥ तदभावे तदर्थं वा तदर्द्धं वापि धारयेत्॥ ततो तु तंदुलैः शुद्धैः
कृत्वा पात्रं चतुष्टद्दलमुत्तमं॥ अमुं स्थापयेत्तत्र ब्रह्मविष्णुशिवात्मकं
तेषां पूजा ततः कार्या श्वेतमाल्यैः सुकोमलैः॥ वस्त्रादिभिरलंकृत्य ब्रा
ह्मणाय निवेदयेत्॥ मंत्रः॥ सुवर्णपात्रसान्नं यस्मादेतत्त्रयीमयं॥
आपतेस्तारकं यस्मात्तग्रहाण द्विजोत्तम॥ तथा समुद्रमेखलां पृथ्वी ९९

सम्यग्दातुश्चयत्फलं॥ तत्फलं लभते मर्त्यः कृत्वेदं दानमुत्तममिति॥ माघ
शुक्लचतुर्थ्यां कुंढिपूजोक्ता काशीखंडे॥ माघशुक्लचतुर्थ्यां तु नक्तव्रत
परायणाः॥ ये त्वां ढुंढेऽर्चयिष्यंति तेऽर्च्याः सुरसुरडुलं॥ विधाय वार्षिकीं
यात्रां॥ नानाद्रव्यैः कुर्यान्नैवेद्यं तिललड्डुकैः॥ उपसर्गसहस्रैस्तु स हंतव्यो
मम माज्ञया होमं तिलाज्यद्रव्येण यः करिष्यति भक्तितः॥ तस्यां चतुर्थ्यां मं
त्रास्तस्य मंत्रः प्रसेत्स्यतीति॥ कूर्मपुराणे॥ माघशुक्लचतुर्थ्यां तु कुं
दपुष्पैः सदाशिवं॥ संपूज्य यो दिनक्ताशी समाप्नोति श्रियं नर इति॥
माघशुक्लपंचम्यां रतिकामपूजोक्ता पुराणसमुच्चये॥ माघमासे सुर

श्रेष्ठे शुक्लायां पंचमितिथौ ॥ रतिकामौ तु संपूज्य कर्त्तव्यः सुमहोत्सवः दानानि
च प्रदेयानि तेन तुष्यति माधव इति वाराहे ॥ माघशुक्लचतुर्थ्यां तु वरमारा
ध्यश्च श्रियः ॥ पंचम्यां कुंदकुसुमैः पूजां कुर्यात्समृद्धय इति ॥ माघशु
क्लसप्तमी रथसप्तमी संज्ञा ॥ अस्यामरुणोदयव्यापिन्यां स्नानं कार्यं तत
दुक्तं स्मृतिसंग्रहे ॥ सूर्यग्रहणतुल्या हि शुक्ला माघस्य सप्तमी ॥ अरु
णोदयवेलायां स्नानं तत्र महाफलं ॥ भविष्योत्तरे ॥ माघे मासि सिते
पक्षे सप्तमी कोटिभास्करा कुर्यात्स्नानार्घ्यदानाभ्यां मायुरारोग्यसंप
पदा इति ॥ इदं च स्नानं तिथ्यादि संकीर्त्य ॥ सप्तार्कपत्राणि सप्तबद 1.2

रीपत्राणि च शिरसि निधाय स्नानं कर्त्तव्यं ॥ शिष्टसमाचारात् ॥ तत्र
मंत्रः ॥ यद्यज्जन्मकृतं पापं मया सप्तसु जन्मसु तन्मे रोगं च शोकं च मा
करी हंतु सप्तमी ॥ अर्घ्यदानमंत्रः ॥ सप्तसप्तिवहप्रीत सप्तलोकप्रदीप
सहितो न ॥ सप्तम्यां देव गृहाणार्घ्यं दिवाकर इति । ततः प्रार्थना ॥ जननी सर्वभूता
नां सप्तमी सप्तिके शुभे ॥ सप्तव्याहृतिके देवी नमस्ते सूर्यमंडले इति ॥
इयं प्रयोगे अतिप्रशस्ता ॥ अरुणोदयवेलायां शुक्ला माघस्य सप्तमी ॥
प्रयागे यदि लभ्येत कोटिसूर्यग्रहैः समेति वचनात् ॥ अस्यामेव तत्र वि
ख्यातो रोकस्नानविधिः ॥ अरुंधति मतिवसिष्ठवचः ॥ माघस्य सिते स

सम्यां सर्वकामफलप्रदां ॥ रूपसौभाग्यजननं स्नानं कुरु वरानने ॥ कृत्वा
पश्चात्प्रमेकनक्तं समाप्नोति श्रवणं जले ॥ रात्रौ तैलाज्येन थाल्ला दत्वा शिर
सि दीपकं ॥ नैकेनैवात्मते यावन्तावत्स्नानं समाचरेत् ॥ सौवर्णे राजते पात्रे
शक्त्या ताम्रमयेथवा ॥ तैलेन वर्त्तिदीप्तिव्याप्तसारजनरंजिताः ॥ समा
हितमनो भूत्वा दत्वा शिरसि ॥ दीपकं ॥ नकेनैवात्मते यावन्तावत्स्ना
नं समाचरेत् ॥ सौवर्णे राजते पात्रे शक्त्या ताम्रमयेथवा ॥ तैलेन वर्त्तिदी
प्तिव्याप्तसारजनरंजिताः ॥ समाहितमनो भूत्वा दत्वा शिरसि दीपकं ॥ भा
स्करं हृदये ध्यात्वा इमं मंत्रमुदीरयेत् ॥ नमस्ते रुद्ररूपाय रसानांप १०३

तये नमः ॥ वरुणाय नमस्तेस्तु हरिवास नमोस्तु ते ॥ उपरितरदीपः स्नात्वा
संतर्प्य देवता ॥ चंदनेन लिखेत्सम्यगष्टपत्रं सकर्णिकं ॥ मध्ये शिवं स्वप
लीकं प्रणवेन च संयुतं ॥ प्राच्यां हृदले रविः पूज्यो आग्नेय्यां वा नलेतया ॥
याम्ये विवस्वान्नैर्ऋत्ये भास्करं पूजयेद्बुधः ॥ पश्चिमे सविता पूज्यः पूज्यो
र्कः अनिलेदले ॥ सौम्ये सहस्रकिरणः शेषं सर्वात्मनेनमः ॥ पूज्याः प्र
णवस्वर्वास्तु नमस्कारान्तयोजिताः ॥ पुष्पैः स्रगंधधूपैश्च अष्टयकुलेन यु
धिष्ठिरः ॥ विसर्ज्य वस्त्रसंवीतं स्वस्थानं गम्यतामिति ॥ ततो गृहं गत्वा
ताम्रपात्रे यथाशक्त्या मृन्मये वी यज्ञ क्लिन्नान् ॥ स्थापयेत् तिलपिष्टं च

सघृतं समुद्रं तथा॥ कांचनं तीलकं कृत्वा अशक्तस्तिलपिष्टजं॥ आका
शरक्तवस्त्रेण पुष्पैर्धूपै राध्यार्चयेत्॥ ततस्तं याचयेद्विप्रे दद्यान्मंत्रेण
तालकं॥ मंत्रः॥ आदित्यस्य प्रसादेन प्रातःस्नानफलेन च॥ दुष्टदोषप्रा
णदुःखघ्नं मया दत्तं तु तालकं॥ तालकंकणनिर्माणं॥ पूजयित्वा परेद्यु
शं विप्रान्नत्वांश्च पूजयेत्॥ ततः पारवंडयादीन्निराजापादीन्वर्जयेन्नस्मर्य
ध्यायान्दिनमतिवाहयेत्॥ ततः नक्तं तु जिवनरो द्विजान्संभोज्य शक्तिरि
ति॥ इयं मन्वादिः शुक्लपक्षस्थत्वात् कुर्यात्पूर्वाह्नव्यापिनी ग्राह्या॥
माघशुक्लाष्टम्यां भीष्मतर्पणादि कार्यं। तदुक्तं पाद्मे॥ माघे मासि २-४

3

सिताष्टम्यां सतिलं भीष्मा॥ तर्पणं श्राद्धं चैव सदा कुर्यात्ते सुतः सतति
भागिनः इति॥ अत्र श्राद्धं काम्यं॥ तर्पणं काम्यं नित्यं च॥ ब्राह्मणा
द्याश्च ये वर्णा विदद्युर्भीष्माय नो जलं॥ संवत्सरकृतं तेषां पुण्यं नश्यति
सत्तमेति मदनरत्नधृतवचनात्॥ इदं च जीवत्पितृकेणापि कार्यं॥ जी
वत्पितापि कुर्वीत तर्पणं यमभीष्मयोः॥ इति वचनात्॥ तर्पणमंत्रश्च॥
भीष्मः शांतनवो वीरः सत्यवादी जितेन्द्रियः॥ आभिरद्भिरवाप्नोतु पुत्र
पौत्रोचितां क्रियां॥ वैयाघ्रपद्यगोत्राय सांकृतिप्रवराय च॥ अपु
त्राय ददाम्येतज्जलं भीष्माय वर्मणे इति॥ धर्मादयस्तु केचिदत्र भीमव्र

दशी संज्ञा ॥ तदुक्तं पाद्मे ॥ त्वया कृतमिदं वीर त्वन्नाम्ना च विख्याति ॥ सान्नीमहाद
शी ह्येषा सर्वपापहरा शुभेति ॥ द्वादशी ॥ एकादशी ॥ एकादश्यां निराहार ॥ स
मभ्यर्च्य केशवमिति संकल्पमंत्रलिंगात् ॥ इयं परविद्धा ग्राह्या पारणं द्वाद
शीयुक्तेति युग्मवाक्यात् ॥ माघ्यां कृत्य विशेषो भविष्योत्तरे ॥ वैशाखी
कार्तिकी माघी तिथयोतीव पूजिताः ॥ स्नानदानविहीनास्ता न नेयाः पां
डुनंदनेति ॥ तत्रैव ॥ माघ्यां स्नानं तथा सम्यक् कुसंतर्प्य पितृदेवताः ॥ तिलपा
त्राणि देयानि तिलाः सप्तजलोदनाः ॥ कर्पासदानमत्रैव धेनुदानं प्रशस्य
ते ॥ कंबलाजिनरत्नानि मौक्तिकौ पापमोचकौ ॥ उपानद्दानमंत्रैवकुत्यम २५

श्वरथेन तु ॥ यत्र वा तत्र वा स्नानं दानं वित्तानुसारतः ॥ काष्ठकाष्ठं वं सर्व श
स्यते पांडुनंदन यथा न केवलं ब्राह्मणानां दानमत्र प्रशस्यते ॥ भगिनीभा
गधेयानां मातुलानां पितृष्वसुः दरिद्राणां च बंधूनां दानं कोटिगुणोत्तरमि
ति ॥ इयमेव योगविशेषेण महामाघी ॥ तथा च गार्ग्यः ॥ मेषराशौ य
दा भौमः सिंहे चंद्रबृहस्पती ॥ भास्करः श्रवणे चैव महामाघी स्मृता ॥ सो
हिणीने श्वरः इयं प्रयागेति प्रशस्ता ॥ मातृमाघी प्रयागे तु कोटिमिषे फलतु
नीतया ॥ शालग्रामे महाचैत्री कृता सा महाफलेति गार्ग्यवचनात् ॥ म
ध्यंत कृष्णाष्टमी अष्टका ॥ हेमंतशिशिरयोश्चतुर्णामपरपक्षगामष्ट

मीव्यवस्थाश्वलायनसूत्रात्॥ अमांतमासेन एव निशीथयोगः सर्वत्र ग्रहण
स्य वचनांतरेणैव सिद्धत्वात्॥ तथा च नारदीये॥ माघकृष्णचतुर्दश्यामादिदेवो
महानिशि॥ शिवलिंगतयोद्भूतः कोटिसूर्यसमप्रभः॥ तत्कालव्यापिनी ग्रा
ह्या शिवरात्रिव्रते तिथिः॥ तथा सर्वेष्वपि परे वा द्युमात्रा निशि चतुर्दशी॥ व्या
प्ता सा दृश्यते यस्यां तस्यां कुर्याद्व्रतं नर इति॥ एवं सति व्रते सर्वोक्तवचनाना
मानर्थक्यात् निदिन एव निशीथव्यापिन्याः सर्वस्या ग्राह्यत्वं प्रतिपादयंति
किंच॥ आर्द्रायां चतुरस्तान्वेदिति वचने सर्वविदे वेत्येवकाराद्उत्तरविद्धानि
वर्त्तिकाद्उत्तरविद्धायाः प्रसक्तिर्गम्यते॥ सा चोभयत्र निशीथयोगाएव संभव
ति॥ न तु सर्वेषां व निशीथयोगो तस्मादुभयत्र निशीथव्यापिनी सर्वैवेति १०६

यत्तु स्कंदपुराणे॥ आदौ मार्गशिरे मासि दीपोत्सवदिनेपि वा॥ गृह्णीयाद्माघमा
से वा द्वादशाब्दमुपोषयेदित्यादि वचः॥ प्रतिमासकृष्णचतुर्दशीषु सोपवासजा
गरणात्मकं काम्यं॥ शिवरात्रिव्रतं विहितं तस्यापि रात्रौ प्रतिमासं पूजायां जागर
णस्य च विधानात् सकलरात्रिसाध्यत्वात् रात्रिव्यापिनी तत्राग्राह्या॥ दिनद्वये
रात्रिव्याप्तिसाम्ये पूर्वा॥ रुद्रव्रतेषु सर्वेषु कर्त्तव्या संमुखी तिथिरिती अत्रैव व
र्त्तेति॥ येषां प्रदोषव्याप्तिर्निशीथयोर्या कालतेषां मते॥ उत्तरेति॥ स्कंदपुराणे माघ
कृष्णचतुर्दश्यां रविवारो यदा भवेत्॥ भौमो वाथ भवेद्देवि कर्त्तव्यं व्रतमुत्तमं॥
शिवयोगस्य योगेन तद्भवेदुत्तमोत्तममिति॥ तथा॥ त्रयोदशी कलाप्येका म
ध्ये च विहितं च सा॥ कृष्णाष्टमी स्कंदषष्ठी शिवरात्री चतुर्दशी॥ एताः पूर्वयुताः

कार्यास्तिथ्यंते पारणं भवेदिति ॥ उपोषणं चतुर्दश्यां चतुर्दश्यां च पारणं ॥ कृतैः
सुकृतलक्षैश्च लभ्यते वाथवा न वेति ॥ तत्र सा त्वस्तमयपर्यंतव्यापिनी चेत्प
रेहनि ॥ दैवं पारणं कुर्यात्पारणान्नास्ति दोषभागिति ॥ शिवरात्रिप्रकरणापठि
तकाव्यादशादिति लिखितं वचनात्तिथ्यंते भतीसादिका पारणस्य कर्तुमशक्य
त्वेतिथ्यंते नोचेत्तिथिमध्य एवेति व्यवस्था ॥ अथ मंत्रसंक्षेपतः शिवरात्रिव्रता
नुष्ठानप्रकारः विना भस्मत्रिपुंड्रेण विना रुद्राक्षमालया ॥ पूजितोपि महादे
वो न स्यात्तस्य फलप्रदः तस्मान्मृदापि कर्तव्यं ललाटे तु त्रिपुंड्रकमिति लैंगात् ।
धृतत्रिपुंड्ररुद्राक्षः तिथ्यादिसंकीर्त्य शिवप्राप्तिकामः शिवरात्रिव्रतं त्वेतत्करि १८
ष्ये महाफलं ॥ निर्विघ्नमस्तु मे चात्र त्वत्प्रसादाज्जगत्पते ॥ चतुर्दश्यां निरा

निराहारो भूत्वा शंभो परेहनि ॥ भोक्ष्येहं भुक्तिमुक्त्यर्थं शरणं मे भवेश्वरेति पठि
त्वा जलं प्रक्षिपेत् ॥ ततो नित्यकृत्यं विधाय रात्रौ प्रथमप्रहरेहं शिवपूजां
करिष्य इति संकल्प्य प्रतिष्ठिते लिंगे अप्रतिष्ठिते वा तद्देवप्राणप्रतिष्ठां
कृत्वा पार्थिवलिंगपूजाप्रकारेण पंचाक्षरेण मंत्रेण वैदिकेन वा पौराणमंत्रैर्वा
प्रणवादिचतुर्थ्यंतनमोन्तशिवानंतवाक्प्रवाहना धूपचारैः पूजयेत् ॥ तत्र वि
शेषः ॥ ॐ ह्रीं ईशानाय नम इति प्रथमप्रहरे दुग्धेन स्नपनं ॥ शीवरात्रिव्रतं देवी
पूजाजपपरायणः ॥ करोमि विधिवद्दत्तं गृहाणार्घ्यं महेश्वरेत्यर्घ्यदानं च ॥
ततस्तन्मंत्रजपेन तत्कथाश्रवणादिभिर्वा जागरणं ॥ तद्ध्यानं तज्जपः स्नानं
तत्कथाश्रवणादिकं ॥ उपवासकृतां ह्येते गुणाः प्रोक्ता मनीषिभिरिति वचना

तः॥ द्वितीयप्रहरे ॐ ह्रौं अघोराय नमः इति दध्ना स्नपनं॥ नमः शिवाय शांताय सर्वपा
पहराय च॥ शिवरात्रौ ददाम्यर्घ्यं प्रसीद उमया सह इति चार्घ्यदानं॥ तृतीये प्रहरे
ॐ ह्रीं वामदेवाय नमः इति घृतेन स्नपनं॥ दुःखदारिद्र्यशोकेन दग्धोऽहं पार्वतीप
ते॥ शिवरात्रौ ददाम्यर्घ्यमुमाकांत गृहाण मे। इत्यर्घ्य। दानं॥ चतुर्थप्रहरे ॐ
सद्योजाताय नमः इति मधुना स्नपनं॥ मया कृतान्यनेकानि पापानि हर शंक
र शिवरात्रौ ददाम्यर्घ्यमुमाकांत गृहाण मे इत्यर्घ्यदानं॥ एवं मूलमंत्रजपादिना
रात्रिमतिवाह्य प्रभाते॥ अविघ्नेन व्रतं देव त्वत्प्रसादात्समर्पितं॥ क्षमस्व
जगन्नाथ त्रैलोक्याधिपते हर॥ यन्मयाद्य कृतं पुण्यं तद्रुद्रस्य निवेदितं १०८

त्वत्प्रसादान्महादेव व्रतमद्य समर्पितं॥ प्रसन्नो भव मे श्रीमन् सद्गतिः प्रतिपा
द्यतां॥ त्वदालोकनमात्रेण पवित्रोऽस्मि न संशयः। इति व्रतं समर्पयेत्॥ पर
दिने यथाशक्ति ब्राह्मणान् भोजयित्वा प्रार्थयेत्॥ संसारक्लेशदग्धस्य व्र
तेनानेन शंकर॥ प्रसीद सुमुखो नाथ ज्ञानदृष्टिप्रदो भवेति प्रार्थ्य बंधुभिः
सह पारणं कुर्यादिति॥ इदं च व्रतं नित्यं। वर्षे वर्षे महादेवी नरो नारी पतिव्र
ता॥ शिवरात्रौ महादेवं कामं भक्त्या प्रपूजयेत्॥ इति॥ स्कांदे॥ वर्षे वर्षे
इति च श्रवणात्। परात्परतरं नास्ति शिवरात्रिव्रतात्परं॥ न पूजयति
भक्त्येशं रुद्रं त्रिभुवनेश्वरं॥ जंतुर्जन्मसहस्रेषु भ्रमते॥ नात्र संशय

इति॥ तत्रैवाकरणे दोषश्रवणाच्च॥ काम्यं च॥ शिवं च पूजयित्वा यो जागर्ति च चतु
र्दशीं॥ मातुः पयोधररसं न पिबेत्स कदाचन॥ मम चक्रस्तु या देवी शिवरात्रि
मुपोषकः॥ गणत्वमक्षयं दिव्यमक्षयं शिवशासनं॥ सर्वान्भुक्त्वा म
हाभोगान्स्ततो मोक्षमवाप्नुयादिति तत्रैव॥ फलश्रवणात्॥ अत्र चचं
डालपर्यंतानुमाधिकारः॥ शिवरात्रिव्रतं नाम सर्वपापप्रणाशनं॥ आ
चांडालमनुष्याणां भुक्तिमुक्तिप्रदायकमिति ईशानसंहितावचनं मा
घकृष्णचतुर्दशी शिवरात्रीः॥ शिवरहस्ये॥ तत्प्रभृत्यपदेवर्षे माघकृ
ष्णचतुर्दशी॥ शिवरात्रिः समाख्याता प्रियेयं त्रिपुरद्विष इति॥ स्कां १०९

दे पि॥ माघफाल्गुनयोर्मध्ये आसिता या चतुर्दशी॥ शिवरात्रिस्तु सा ख्या
ता सर्वयज्ञोत्तमोत्तमेति॥ शिवरात्रिव्रतं चोपवासपूजाजागरणरूप
प्रधानत्रयसमुदायरूपं॥ उपवासप्राधान्येन वलादपि च जागरात्॥ शि
वरात्रेस्तथा तस्मिन् लिंगस्यापि च पूजया॥ अक्षयान्लभते भोगान् शि
वसायुज्यमाप्नुयादिति नागरखंडे॥ त्रयाणामपि फलसंबंधात्॥ के
चिदुपवासमात्रश्रवणं त्रियोरुपलक्षणं॥ केचित्तु प्रत्येकं प्र
त्येकमलैनेकस्य द्वयोर्वा श्रवणं॥ अथवा शिवरात्रिं च पूजाजागर
णैर्नयेत्॥ कश्चित्तु एषां विशेषेणाव्रतहीनोपि यः पुमान्॥ जागरं कुरु

ते तत्र सरुद्रसमं तां प्रजेऽदित्यादिषु॥ अथवादिश्रावणश्रवणात्॥ अत्रा
पि उक्ताष्टमीवन्नात्रापि वित्रयोदशीविधोत्सवति॥ रात्रिसाध्यव्रतत्वात्॥
तदुक्तं। स्कांदे॥ निशि भ्रमंति भूतानि शक्तयः शूलभृद्यतः। अतस्तस्यां च
तुर्दश्यां सत्यां तत्पूजनं भवेदिति॥ नागरखंडेपि॥ तस्माद्रात्रौ इमे रु
ज्याय: करिष्यति मानवा इति॥ तत्रार्धरात्रादूर्ध्वमिष्यनुवर्तमानयात्रयो
दश्या युक्ता चतुर्दशी परेद्युर्निशीथा योगिन्यपरैव॥ माघासिते भूतदि
नं हि राजन्नुपैति योगं च दिपंचदश्या जयया प्रयुक्तं न तु जातु कुर्याच्छि
वस्य रात्रिं प्रियकृच्छिवस्येति हेमाद्रौ धृतवचनात्॥ प्रयया त्रयो ११०

दश्या॥ प्रकर्षेणायुक्ता मितुक्तत्वात्॥ पूर्वेद्युस्त्रयोदश्यां अर्धरात्रिव्याप्ति
प्रतीतिः॥ या तु पूर्वेद्युरेव निशीथयोगिनी दिनद्वयेपि वा निशीथयोगि
नी सा पूर्वैव॥ तदुक्तं स्कांदे॥ कृष्णाष्टमी स्कंदषष्ठी शिवरात्रिचतुर्दशी॥
एताः पूर्वयुताः कार्यास्तिथ्यंते पारणं भवेत्॥ तथा॥ जयंती शिवरात्रि
श्च कार्ये भद्राजयान्विते॥ तथा॥ माघफाल्गुनयोर्मध्ये यासा शिवचतु
र्दशी। अनंगेन समायुक्ता कर्तव्या सा सदा तिथिरिति॥ ननु पूर्वेद्युरेव
निशीथयोगिनीकाल्ययोगात्पूर्वलिखितवचनेन्यपूर्वैवेति युक्तं
दिनद्वयेन चयोगिनी तु परेद्युः प्रदोषनिशीथोभयव्याप्तिमात्संकल्प

काव्यमारभ्य सत्यादहोरात्रौ नयत्या गाभ्यपरैरप्युक्ता न तु पूर्वा॥ अत एव मा
धवेनापि दिनद्वयनिशीथव्यापिनी पूर्वैव ग्राह्येत्युक्तं॥ तिथितत्वेप्येवमे
व॥ तत्कथं पूर्वैवेत्युच्यत इति चेत॥ उच्यते॥ अर्द्धरात्रात्पुरस्तात्त्वे ज्जया
योगो यदा भवेत॥ पूर्वविद्धैव कर्तव्या शिवरात्रिः शिवप्रियैरिति पद्म
पुराणवचनात मोटशाएव विषये पूर्वविद्धा विधानार्थी॥ अतत:॥ स
र्वाण्यपी पूर्वविद्धा विधायकानि प्राग्युक्तानि वाक्यानि नद्दृत्तान्यपि पापा
नां दृष्ट्वैवेनिः कृतिपुरा॥ न द्दृश्य कुर्वता पुंसां कुप्युक्तां तिथीत्वीमं॥ मि
ति स्कंदपुराणीयो माकवास्यानिषेध श्वेता दृशा विषय एवं सार्थकः॥ पूर्व १११

८

स्यात इति चरिस्थापित सूर्योदयात् पूर्वं प्रज्ञतं त्रयाति व्याहोलिका दीप मायय
दिकृष्टि त्वकाकोलोभ्यते तदा प्रदोषाति क्रमेण तत्रैव कर्तव्यं राकायाम द्
या पर्द्धचतुर्दश्य यदा भवेत॥ तो ज्ञानजा वसानेतुनिशीयां तेपि दीपक
ये दितित्तविध्यात्तरात॥ यन्नातु पूर्व दिने मन्वादित: काको न लभ्यते
उत्तरादिने च सूर्यास्तात्पूर्वाण वहार्तामा समकासाम हो मन्त्र पुच्छेकार्य॥
दधिब्बो यानि कर्माणि प्रयुक्तानि तत्प्रयुक्तानि च॥ तानि सर्वाणि सिध्यंति
विशिष्टयुक्तेन संशायइति ललक्ष्म नात॥ अस्मिन्नेव वर्षे यदा उत्तरापो
र्णमास्यी नेरत्वनिसार्द्धत्रय परिमिता अधिकाया प्रतिपच्चो नर दिनेर
याम

द्विगाभिनीतदर्पोर्णमास्यान्तरप्रतिपत्संदोषे एव कार्यं न तु पूर्वरात्रौ वि
शिष्टे॥ तथा च नविष्णोत्तरे॥ सार्द्धयाममंत्रयं पूर्णा द्वितीये दिवसे पदा
प्रतिपद्वर्द्धमाना तु तदा सा होलिका स्मृतेति॥ एवं सति योत्तरदिने विकृ
ल्लप्रदोषां त्परेद्येर्द्धिग्रमाप्रवर्त्तेयं॥ न तु स्यात यदा पूर्वारात्रिः॥ सर्वा
प्रदोषव्यापोत्तरदिने प्रदोषे व्यत्वं न्यस्य हुण्ण क्रांतस्तदा सर्वेषामेवव
लीकांस्तत कं राक्त दर्शनिद्वलशुभविलाला कार्यं तत्र हेलिदिपन॥ स्ना
त्वाकर्माणि कुर्वीत भक्तमन्नं विवर्जयेदिति वचनात्॥ स्नानोत्तरं नित्यं
नैमित्तिकेष्वधिकाविघाताहिति॥ अत्रैव कल्पद्रावविशेषः कल्पविं ११२

११

त्रामणीं ब्रह्मि॥ नरा दोलो आगतं दृष्ट्वा गोविंदपुरुषोत्तमं। फाल्गुन्यां सं
यतो भूत्वा गोविंदस्य पुरं व्रजेत्॥ इयं मन्वादिरपि निर्णयसूक्त एसेवा॥ ए
तदुत्तरप्रतिपदि कृत्यविशेषो नविष्णोत्तरोपवृत्ते माधवे मासि प्रतिप
द्यदितीरे वा वित्तु पक्रम्य ामंत्रिते चार्चितेव व उपविष्ट सेषु राजिरो वेउ
क्रकारयेत्केष्टं वर्णकैश्चाद्वतैः शुचैः तन्मध्ये स्थापयेत्पीठं शुक्लवस्त्रो
त्तरच्छदः॥ अग्रतः पूर्णकुंभं स्थापयेत्स दत्ते वेर्युतं॥ साक्षतं सहितं रं
एं पंच सितवंदनचर्चितं॥ तस्मा सने चोपविष्टस्य ब्राह्मणयोषेणाक्षारता॥ च
र्चयेच्चंदने नरी रक्षं गागास्तु लक्षणं पद्मरागोत्तरे पदांश्रो ष्टं शुक्क

विभूषितां॥ वसुधारां शिरोत्रं च॥ दधिदूर्वाक्षतान्वितां॥ वर्द्धापयित्वा
श्रीखंडमाथुरारोग्यवृद्धये॥ वसुधामिति धारा हारस्यमूर्द्धनि चंदनेन
चर्चयेदित्यर्थः॥ तच्चचंदनं वर्द्धापयित्वं किंचिदवशेष्य पश्चात्तच्च प्राश
येदिद्धा वृक्ततत्पुष्यं स्वंदनं॥ मनोज्ञवस्त्रसा पूजा ऋषिभिः॥ संप्रदर्शि
ता॥ साशनमंनत॥ इति शिवरात्रिनिर्णयः॥ एतदुत्तरा माघवास्यां युगा
दिः॥ दर्शतु माघमासस्य प्रवृत्तं द्वापरं युगमिति स्कांदात्॥ अमाव
स्या माघस्येति मत्स्यपुराणाच्च॥ ब्राह्मवैवर्त्ते तु माघी पौर्णमासी युगा
दिरिति त्युक्तं॥ माघे च पौर्णमास्यां तु घोरं कलियुगं तथेति॥ विष्णुपु ११३

राणे माघासिते पंचदशी दकाचिद्दुपैति योगं यदि वारुणेन॥ ऋक्षेण का
लः सपरः पितॄणां न ह्यल्पपुण्यैर्नृप लभ्यते सा विनि॥ वारुणं शतवार
कामकृत्वारते॥ काचिद्धनिष्ठा यदि नाम तस्मिन्भवेत्तु कूपालदापि
तत्त्वः दत्तैस्तिलाद्यं प्रददाति तृप्तिं वर्षायुतं तत्कुलजैर्मनुष्यैरिति॥ फा
ल्गुनपौर्णमास्यां होलिकोत्सवः॥ भविष्योत्तरे॥ पंचदश्यां तु कोऽसौ फाल्गुण
नस्य नराधिपवसु [illegible] स्या॥ तथा ह्यशंकिता लोका रमंतु च हसंतु च॥ दा
रुजानि च खड्गानि [illegible] लीलासमरोत्सुकाः॥ योधा इव विनिर्यांतु शि
शवः संप्रहर्षिताः॥ संचयं शुष्ककाष्ठानामुपलानां च कोरयेत्॥ तत्रा
का

र्वतोगुरवेवरिति॥ तत्र भद्रायां सत्यां च कार्यं भद्रायां दीपिता होला राष्ट्रं
भंगं करोति वै॥ नगरस्य च नैवेष्टा तस्मात्तां परिवर्जयेदिति पुराणसमु
च्चयात्॥ तत्र पूर्वस्यां प्रदोषे भद्राया असत्वेऽत नैव कार्या॥ यदा तु तत्र प्र
दोषो न भवति तदा॥ अपरपंचदशवेलातः शेषसूर्योदयः स्मृतश्च॥ चूतमग्र्यं
वसंतस्य माकंदकुसुमं स्तव॥ सचंदनं पिबाम्यद्य सर्वकामसमृद्धये॥
अनंतरं द्विजेंद्राणां स्तुतमाधवं दिनं॥ दद्याद्दानं यथाशक्त्या कामो मे
प्रीयतामिति॥ ततो भोजनवेलायां घृतं पाकं नतेन हि॥ प्राशयेत्तल्लघयम
चात्तं ततो भुंजीत कामतः॥ य एवं कुरुते पार्थ शास्त्रोक्तं फाल्गुनोत्सवं॥ ११५

अनायासेन सिध्यंति तस्य सर्वे मनोरथा इति॥ अस्यामेव विशेषः॥
पद्मपुराणे॥ चैत्रे मासि महाबाहो पुण्या प्रतिपदापरा॥ तस्यां यश्व
पचं स्पृष्ट्वा स्नानं कुर्यान्नरोत्तमं॥ न तस्य दुरितं किंचिन्नाधयो व्या
धयो नृप॥ भवंति कुरुशार्दूल तस्मात्स्नानं समाचरेत्॥ दिव्यानीरा
जनं तद्धि सर्वरोगविनाशनं॥ गोमहिष्यादि यत्किंचित्तत्सर्वं भूषये
न्नृप॥ तैलवस्त्रादिभिः सर्वास्तोरणाधस्ततो नयेत्॥ ब्राह्मणानां
ततो भोज्यं कुर्यात्कुरुकुलोद्वहेति॥ अत्र प्रतिपदौदयिकी ग्राह्या
प्रवृत्ते मधुमासे तु प्रतिपद्युदिते रवाविति विष्णोत्तरादिति केचि

ता॥ होलिकादीपनाख्या वह्नितो नरः दिनं ग्राह्यं चामेति तदुक्तं॥ अतए
व वृद्धवसिष्ठेन हर्षादिविहिता॥ वत्सरादौ वसंतादौ बलिराज्ये तथै
व च तैलाभ्यंगमकुर्वाणो नरकं प्रतिपद्यत इति वृद्धवसिष्ठवचना
त्॥ पूर्णिमांते चैत्रकृष्णत्रयोदशी शततारायुता वारुणीति तत्र गंगा
स्नानं महाफलं॥ तदुक्तं स्कांदे॥ वारुणेन समायुक्ता मधौ कृष्णात्रयोद
शी॥ गंगायां यदि लभ्येत सूर्यग्रहशतैः समेति॥ इयमेव शनिवारयो
गे महावारुणी शुभयोगयोगे महामहावारुणी महाफलाच्या॥ तथाच
तत्रैव॥ शनिवारसमायुक्ता सा महावारुणी स्मृता॥ गंगायां यदि ल 116

भ्येत कोटिसूर्यग्रहैः समम्॥ शुभयोगसमायुक्ता शनौ शततारा यदि॥
यदि॥ महामहेति विख्याता त्रिकोटिकुलमुद्धरेदिति॥ फाल्गुनामावा
स्यामन्वादिः॥ फाल्गुनस्य त्वमावास्यति मास्यात्॥ सा वा पाद्धिकी या
त्या॥ कल्पापद्मगतत्वादिविविधं कृतं ग्रंथं कृष्णचंद्राभिनेवमायकृ
स्मगतौ रविवारे॥ ग्रंथः पूर्तिं निकरोल्लिकूरामः श्रीरमापति समर्प
ण बुध्या॥ तस्य वंशप्रसूतो यो रामचंद्र इति विश्रुतः॥ तेनेयं निर्मिता
सम्यक् कल्परत्नावली शुभा॥ अनया प्रीयतां लक्ष्मीनृसिंहो भक्तव
त्सलः॥ कुलदैवतमित्येतद्गुणं स्यात्तद्गुणामति॥ इति श्रीमद्दे

दांतद्यांगितनतत्सद्याक्षकुलकृहृत्सुतविठ्ठलभट्टसूरिसुतत्र्यंबकराम
चंद्रविरचिताकल्पलतावल्लिसमाप्ता॥ ॥श्री॥ ॥श्री॥ श्री।

नचभवतियोगः स्नेहविच्छेदहेतुर्जगतिगुणनिधीनांसज्जनानांकदाचित्॥ घनपटल
विरुद्धोदूरसंस्थोपिचंद्रः किमुकुमुदवनानांप्रेमभंगंकरोति॥१॥
नित्यंब्रह्मयथास्मरंतिमुनयोहंसायथामानसंसारंगाजलदागमंमधुकलिहःपुष्पोद
यंवैयथा॥ युष्मंदर्शनलालसाः प्रतिदिनंतस्मात्स्मरामोवयंधन्यःसोपिचवासरोत्रभ
वितायत्रावयोःसंगमः॥१॥ ॥५॥

3.50 ११७

१८